* श्रीः *

ताराकपूरराजस्तोत्रम्

'प्रकाशिकया' व्याख्यया युतम्

[ताराष्टक-नीलसरस्वतीस्तोत्र पीताम्बराष्टकसहितम्]

प्रकाशकः-

श्री पीताम्बरा पीठ

दतिया (म०प्र०)

* श्रीतारिण्यै नमः *

श्रीताराकर्पूरराजस्तोत्रम्।

श्री १००८ स्वामिजीमहाराजविरचितया

'प्रकाशिकया' नाम्न्या संस्कृतव्याख्यया

हिन्दीभाषया च संवलितम्।

दतियाराजनिवासिना 'साहित्यभूषण' पदवीभाजा

श्रीबलवीरसिंहेन निर्मितहिन्दीपद्यानुवादेन समन्वितम्।

(ताराष्टक-नीलसरस्वतीस्तोत्र-पीताम्बराष्टकैः

सनाथीकृतम्)

तृतीय संस्करण – सम्वत् २०६६

प्रकाशक :–
श्री पीताम्बरा पीठ, दतिया (म.प्र.)

मूल्य :– २० रूपये

मुद्रक :
शिवशक्ति प्रेस प्रा० लि०
नयागांव, ग्वालियर रोड, झांसी (उ०प्र०)
फोन–0510–2441092

प्रकाशकीय

विद्वानों को यह विदित ही है कि परम पूज्य गुरुवर्य पूज्यपाद पीताम्बरापीठाधीश्वर श्री स्वामीजी महाराज ने ताराकर्पूरराज स्तोत्र की प्रकाशिका नामक संस्कृत टीका कर साधक वर्ग का महान् उपकार किया है।

श्री तारा में कर्पूर की भांति धवल प्रकाश रूपी स्तवराज श्री ताराकर्पूर स्तवराज की व्युत्पत्ति की सार्थकता घटित होती है।

ग्रन्थ के अन्त में तीन स्तोत्र – श्री ताराष्टक, नील सरस्वती स्तोत्र एवं पीतांम्बराष्टक का समावेश भी किया गया है।

प्रस्तुत ग्रन्थ की प्रकाशिका टीका एवं स्तोत्र साधकों के लिए महद् उपयोगी सिद्ध होंगे, यही कामना है।

वासन्तिक नवरात्र
सम्वत् २०६७

विनीतः
श्रीमती रेणु शर्मा
मंत्री
श्री पीताम्बरा पीठ
दतिया (म.प्र.)

प्राक्कथनम्।

विदितचरमेव विदुषां यत् सनातनो वैदिकधर्म एव भगवदीयो धर्मः, पाश्चात्यानामपि सम्मतमेतद् यद् वेदेभ्योऽन्यन्नास्ति प्रत्नं धर्मपुस्तकं जगतः पुस्तकालये। तच्च युगादौ अनादिसिद्धात् सच्चिदानन्दपरमात्मनः सकाशादधिजगे भगवान् पद्मोद्भव इति श्रुतिस्मृतिपुराणादिषु प्रसिद्धम्। तान् चतुरो वेदान् भगवान् ब्रह्मा सृष्टयादावेव स्वमानसादुत्पादितान् पुत्रान् जगतः स्थितिहेतवे ग्राहयामास। वेदातिरिक्तं तान्त्रिकमपि ज्ञानं गोप्यात्मकं च तेभ्यो ददौ, यथा महर्षये वशिष्ठाय श्रीताराविद्योपदेशं प्रदत्तवान् वेदार्थतत्त्वज्ञानायेति तारातन्त्रे विश्रुतम्, एवमेवान्येषामपि ब्रह्मपुत्राणामितिवृत्तं दृश्यते। श्रुतिपदेनापि तान्त्रिकज्ञानस्य व्यवहारो दृश्यते तदुक्तं मन्वर्थमुक्तावल्यां "श्रुतिर्द्विविधा वैदिकी तान्त्रिकी च।" भगवता श्रीकृष्णेनापि अवादि 'वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः'इत्येन ज्ञायते तान्त्रिको धर्मोऽपि सनातनकालादेव प्रवृत्तः। सनातनी पञ्चदेवोपासना वैदिकैस्तान्त्रिकैश्च उभयैरेव क्रमैरनुष्ठीयते आस्तिकैस्तथापि तान्त्रिकपदेन साम्प्रतं शाक्तोपासनैव प्राधान्येन गृह्यते (महामहिम शालिनी श्रीपराशक्तिब्रह्मस्वरूपिण्येव शक्तिशक्तिमतोरभेदन्यायेन शक्त्युपासना ब्रह्मोपासनातोऽविनाभूतैव इति सर्ववादिनिर्णयः। यद्यपि केचिद्दार्शनिकाः शक्तितत्त्वमेव नाङ्गी–कुर्वन्ति तथापि तदकिञ्चित्करमेव।) यद्यपि चतसृणामन्यासां

ब्रह्मोपासनानामपि तन्त्राणि सन्ति तदनुयायिभिश्चार्चयन्ते तथापि तदल्पतरमेव। शाक्तोपासना अनेकप्रकारिका विद्यन्ते, परं तासु दशमहाविद्यानामेव प्राधान्यं मन्वते साधकाः तत्रापि, विद्यात्रयमेव, (काली, तारा षोडशी) मुख्यत्वेन वरीवर्त्ति, आद्या काली, द्वितीया तारा, इति प्रसिद्धिः। यथा कालिकायाः कर्पूरस्तोत्रं साधकैराद्रियते तथैव श्रीतारोपासकैस्ताराकर्पूरकमपि रहस्यभूतं स्तोत्रं पठ्यते। अस्मिन् स्तोत्रे प्रायेण श्रीताराविद्यायास्तत्त्वं संक्षेपरीत्या भगवता शिवेन सन्निवेशितं, श्रीशिवपार्वतीसंवादेन फेत्कारिणीतन्त्रेऽस्य प्रथनं जातम्। ताराकर्पूरमिति नाम अस्य स्तोत्रस्य कथं जातमस्य मूलं नोपलब्धं यतः कर्पूरपदस्य सार्थक्यं न विद्यतेऽस्मिन् यथा 'कर्पूरमध्यमान्तमित्यनेन काली कर्पूरस्य। अत्रापि 'कर्पूरैरुज्वालैरिति पदं पठितं तथापि दूरत्वान्नामकरणेऽनुपयुक्तम्। यथा ईशावास्यमिति प्रथममोक्तेन पदेन वाजसनेयिनामीशोपनिषदिति नाम 'महिम्नः पारन्ते' इत्यनेन महिम्नस्तोत्रसंज्ञाकरणं च। तथैवानुमीयते यदस्य स्तोत्रस्य शैलीं सर्वथा कालीकर्पूरमनुकुर्वाणामेवं प्रबन्धरचनायां साम्यप्रकारं चालक्ष्य साधकैस्तारास्तोत्रमपि कर्पूरपदेन व्यवहृतं भविष्यति। यथा पुष्पदन्तनिर्मितशिवमहिम्नरीत्या निर्मितत्वाद् राममहिम्न –कृष्णमहिम्न –शक्तिमहिम्नेत्यादिस्तोत्राणां व्यवहारः। यद्वा श्रीतारार्चायां कर्पूर इव धवलः प्रकाशको वा स्तवराजस्ताराकर्पूरस्तवराज इति व्युत्पत्या सार्थक्यं भवितुमर्हति यतः संक्षेपेण ताराविषयकसर्वार्थानां

प्रतिपादकत्वाद् द्योतकत्वात् प्रकाशकत्वाच्च। अद्यावधि अयंस्तवष्टीकां विनैव आसीद् यथा कालीकर्पूरस्य बह्व्यष्टीकाः सन्ति तथा अस्य न काऽपि व्याख्या मे दृष्टिपथं याता, निष्टीककमिदं दृष्टवा रहस्यभूतं तत्त्वमस्य दुर्बोधं ज्ञात्वा चास्य व्याख्याकरणेन साधकवृन्दस्य परमं हितमवेक्ष्य व्याख्यातुमेतदस्मत्पूज्यवराः श्रीस्वामिपादाः प्रार्थिताः। तेषां परमानुकम्पया प्रकाशिकया नाम्न्या श्रीताराकर्पूरस्तोत्रव्याख्यया साम्प्रतमनुगृहीतोऽस्मि। तत्प्रकाशनं च लाभप्रदं विज्ञाय साधकानां समक्षे प्रकटीकर्तुं प्रयत्नः। व्याख्येयं सरलतया स्तोत्रस्थितान् सर्वान् अर्थान् प्रकटयति श्रुतिस्मृतिप्रमाणैस्तथा तारातन्त्र –तारारहस्यादि तन्त्रग्रन्थेभ्यः प्रमाणभूताञ्छ्लोकान् उद्धृत्य अत्र च सम्यक् संनिवेश्य स्फुटरीत्या स्तोत्रस्थश्लोकानां व्याख्यानं कृतमस्ति पञ्चदशश्लोकमारभ्य एकोनविंशतिपर्यन्तं निरूपणं चमत्कारपूर्णं विद्यते। आशास्ते अनया टीकया श्रीतारोपासकानां प्रीतिर्भविष्यति। श्रीताराष्टकं तथा श्रीनीलसरस्वतीस्तोत्रं श्रीपीताम्बराष्टकं चान्ते संग्रहीतम्। अनेन संग्रहेण यदि किञ्चिदपि हितं भविष्यति तर्हि स्वश्रमं सफलं मंस्ये–इति।

निवेदक :–

आयुर्वेदाचार्यः पं० वैद्यनारायणदासः।

श्रीताराकर्पूरस्तोत्रम्



श्रीताराभगवती

समर्पणम्

श्रीतारामुनिभिः स्तुताभ्युदयदा ब्रह्मात्मज्ञानप्रदा
खड्गेन्दीवरकर्त्रिखर्परकरा! चन्द्रार्धसंशोभिता।
जाड्यं बुद्धिकृतं च पापसकलं नाशं नयत्याशु सा
भूयाद् धर्मविवृद्धये त्रिजगतां विद्या द्वितीयापरा।।
स्तोत्रं तत्कर्पूरनाम प्रथितं भावैरपूर्वैर्युतं
व्याख्यां तस्य विधाय स्वल्पवचनैस्तत्पादयोरर्पितम्।
तस्मात्तुष्यतु तारिणीपरिणुता पूर्वैरनेकैरपि
प्रेम्णा किं न ददाति मातृवदने बालोऽपि ग्रासं मुदे।।

- व्याख्याकृताम्

* श्री तारा यन्त्रम् *



अनुक्रमणिका

स.क्र.	श्लोकाङ्काः	पृष्ठाङ्काः
१–	ॐ कारोद्धारस्तत्फलम्	१
२–	मायाबीजोद्धारस्तत्फलम्	४
३–	बधूबीजोद्धारस्तत्फलम्	५
४–	कूर्चबीजोद्धारस्तत्फलम्	७
५–	अस्त्रोद्धारस्तत्फलम्	६
६–	नीलसरस्वतीविषयः	१७
७–	एकजटाविषयः	१८
८–	श्रीतारामन्त्रकथनम्	१६
६–	ध्यानं तत्फलम्	२०
१०–	पुरश्चरणम्	२१
११–	तर्पणम्	२४
१२–	पूजाविधिः	२६
१३–	होमविधिः	२७
१४–	बलिदानम्	३०
१५–	महापूजाविधिः	३४

स.क्र.	श्लोकाङ्काः	पृष्ठाङ्काः
१६–	रतासक्तचिन्तनं तत्फलम्	३६
१७–	सर्वसुजनजपाख्यप्रयोगः	३८
१८–	दीर्घायष्ट्वाग्मित्वयोः प्रयोगः	३९
१९–	ध्यानेन सार्धं भोगमोक्षप्रदो जपः	४१
२०–	चन्द्रग्रहण–नवमी–सूर्यग्रहणप्रयोगः	४२
२१–	प्रार्थना प्रकारम्	४४
२२–	स्तोत्रफलकथनम्	४६
२३–	श्रीताराष्टकम्	५०
	श्रीनीलसरस्वतीस्तोत्रम्	५२
	श्रीपीताम्बराष्टकम्	५४

।। ॐ तत्सत।।

।। नमः श्रीतारिण्यै।।

अथ

श्रीताराकर्पूरराजस्तोत्रम्

इह हि भगवान् आदिगुरुः सदाशिवस्तारिण्युपासङ्गैकचित्तानां साधकानां परमं मोदमावहन् समस्तोपासनारहस्यं संक्षेपेण विंशतिश्लोकैरेव उपदिदिक्षुः प्रथमतः सकलपुरुषार्थसाधकं पञ्चाक्षरविद्यास्वरूपं पञ्चभिः श्लोकैः प्रकटयान्नादौ प्रधानभूतं प्रणवबीजमुद्धरन्नाह श्रीकण्ठेति –

श्रीशिव उवाच-

श्री कण्ठामृतकेशवर्णघटितं चन्द्रार्धविन्दूज्ज्वलं,
बीजं यत्परमं गुणत्रयमयं कामप्रदं मुक्तिदम्।
मातः! शङ्करवल्लभे! प्रतिदिनं ध्यायन्ति ये ये सदा,
ते ते यान्ति चिदात्मकं हरिहरब्रह्मादिसाम्यं मुदा।।१।।

अथ प्रकाशिकाव्याख्या।

सच्चिद्घनं परानन्दं नत्वा बोधप्रदं गुरुम्।
ताराकर्पूरराजस्य व्याख्यां कुर्वे प्रकाशिकाम्।।

हे मातः शङ्करवल्लभे शिवप्रिये!, श्रीकण्ठोऽकारः अमृतकेश उकारः क्वचिदमरकेश इति पाठान्तरं तौ च वर्णौ ताभ्यां घटितं युक्तं चन्द्रार्धविन्दूज्ज्वलम्, चन्द्रस्यार्द्धः चन्द्रार्धः विन्दुश्च ताभ्याम् उज्ज्वलं

प्रकाशितं गुणत्रयमयं सत्त्वरजस्तमांसि गुणाः तन्मयं तत्प्रचुरं तत्प्रधानमिति यावत् प्राचुर्यार्थे मयट्, कामप्रदं कामानां दातृ मुक्तिप्रदं मोक्षदं यत्परमं प्रवानं बीजम् एतावता ओंकाराख्यं बीजमुद्धृतं भवति (ॐ) प्रोक्तं च शिवस्तोत्रे–ॐकारं विन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं चैव ॐकाराय नमो नमः। छान्दोग्ये च आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते (छा० ३/१) एतद्ध्येवाऽक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्। एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते (क. १, २, ६, ७) प्रश्ने चोक्तं तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चेति (५/७) ओमित्येतदक्षरमिदं सर्वम् (मा० १) 'ओमित्येकाक्षरं ब्रह्म' इति भगवद्वचनात् अन्यच्चातन्त्रे ॐकारस्य तार इति नामप्रसिद्धं तारकत्वात्तारः मुक्तिप्रदः तस्यैव तारस्य वाच्यात्मिका प्रधानभूतेयं शक्तिस्तारेति रहस्यविदः। ॐकारदेव हि सर्वे मन्त्रजातमाविर्भूतमिति मान्त्रिकाः। शब्दब्रह्मेति नाम्ना च व्यवह्रियते अकारः सत्त्वगुण उकारो रजोगुणो मकारस्तमोगुण इति गुणत्रयमयकथनं शब्द ब्रह्मण एव चतुर्विधा सृष्टिः सञ्जायते सत्त्वगुणमादाय विष्णुः स्थितिं करोति रजोबाहुल्येन ब्रह्मा सृजति तमः प्राचुर्येण रुद्रः संहरति। तथा चोक्तं शैवपुराणे–'त्रिधा भिन्नो ह्यहं विष्णो ब्रह्म–विष्णु–शिवाख्यया। सर्गरक्षालयगुणैर्निष्कलोऽयं सदा हरे' इत्येन त्रिगुणकार्यत्वं हरिहरब्रह्मदीनां सिद्धं भवति। भागवते च 'आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज। सृजन् रक्षन् हरन् विश्वं दधे संज्ञां क्रियोचिताम्' इत्यादि प्रमाण

जातैरोङ्कारमहिमा गुणत्रयभिभागश्च ज्ञायते। ये ये साधका जापकाः प्रतिदिनं नित्यं सदा सर्वस्मिन् काले एतद् बीजं ध्यायन्ति चिन्तयन्ति ते ते चिदात्मकं चैतन्यस्वरूपकं ब्रह्मरूपं तेन सार्धमेकीभावं हरिहरब्रह्मादिसाम्यं च हरिः विष्णुः हरः शिवः ब्रह्मा प्रजापतिः आदिपदेन देवराज इन्द्र इत्येतैर्दैवैः साम्यं तुल्यत्वं भोगमात्रसाम्यलिङ्गाच्चेति न्यायात् मुदा हर्षेण अनायासेन यान्ति प्राप्नुवन्तीति स्पष्टार्थः।।१।।

श्री तारा साधकों पर अनुग्रह करते हुए भगवान शिव पार्वती जी से तारा–मन्त्रोद्धार कहते हुए, सर्वप्रथम मन्त्र के प्रधानाङ्गभूत ॐकार बीज के गुण तथा प्रभाव बतलाते हैं–

हे शिवप्रिये मातः! श्रीकण्ठ–'अ', अमृतकेश––'उ', इन दो वर्ण से बना हुआ तथा चन्द्रार्धबिन्दु–"ँ" से प्रकाशित, भुक्ति–मुक्ति को प्रदान करने वाले, त्रिगुणात्मक (सत्त्व, रज, तम) परमोत्कृष्ट बीज **'ॐ'** को जो जो साधक चिन्तन करते हैं, वे चैतन्यस्वरूप हरि, हर और ब्रह्मादि देवों की तुल्यता को अनायास ही प्राप्त हो जाते हैं।।१।।

श्री कण्ठामृतकेश वर्ण शशिकला बिन्दु से शोभावान्।
है जो त्रिगुणात्मक, काम-प्रद, मुक्ति-प्रदायक बीज महान्।।
मातः शिवप्रिये! उसका जो धरते रहते ध्यान सदैव।
वे चैतन्यरूप विधि, हरि, हर का पाते हैं साम्य तथैव।।१।।

मन्त्रस्यादिमं वर्णमोङ्काराख्यं निरूप्य द्वितीयं मायाख्यं

बीजमुद्धरँस्तत्प्रभावं च व्यञ्जयन्नाह व्योमार्णमिति–

व्योमार्णं वामनेत्रान्वितमनलयुतं बिन्दुचन्द्रार्धयुक्तं,
बीजं ते गुह्यमेतत्त्रिभुवनजननि त्रिक्षणे ये जपन्ति।
तेषां वक्त्रारविन्दे विहरति मधुरा, गद्यपद्यावली गी-
र्मातश्चन्द्रार्धचूडे सकलभयहरे सिद्धिभाजां नराणाम्।।२।।

टी०:– हे त्रिभुवनजननि सकलविश्वजनयित्रि! व्योमार्ण हकारः क्वचिद् व्योमार्धमिति पाठःतेन अर्धहकारः वामनेत्रम् ईकारः अनलो रेफः एतैस्त्रिभिवर्णैर्युतं तथा बिन्दुं चन्द्रार्धाभ्यां च युक्तम् एतावता **'ह्रीं'** इति बीजमुद्धृतं ते तव गुह्यं गुहायां भवं रहस्यमयम् एतद्बीजं ये केचित्साधकास्त्रिक्षणे कालत्रये क्वचित् त्र्यक्षरमिति पाठः, तन्मन्त्रविशेषणं जपन्ति मनसा अभ्यस्यन्ति। हे मातः चन्द्रार्धचूडे चन्द्रार्धशिखे! सकलभयहरे समस्तभयनाशिनि! सिद्धिभाजां सिद्धयोऽष्टौ 'अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः' ता भजन्ते सेवन्ते ते सिद्धिभाजस्तेषां सिद्धिभाजां नराणां साधक प्रवराणां तेषां वक्त्रारविन्दे मुखकमले गद्यपद्यावली गद्यं च पद्यं गद्यपद्ये तयोः अवली श्रेणिर्धाराप्रवाहवद् वाग्व्यापार इति यावत् तदुक्तं 'गद्यपद्यमयी वाणी भवेद्गङ्गाप्रवाहवत्' मधुरा माधुर्यादिगुणविशिष्टा गीः वाणी सरस्वती विहरति क्रीडति 'प्रसरति कविता' इत्यपि पाठान्तरं काव्यकर्तृत्वं नित्यं नवं नवं जायत इति तदर्थः। एतद्बीजाक्षराभ्यासशीलस्य साधकस्य मुखकमलं सरस्वती न कदापि जहातीति तात्पर्यम्।।२।।

मन्त्र के द्वितीय बीज हींकार के गुण को कहते हैं :–

हे त्रिभुवनजननि! व्योमार्ण – 'ह', वामनेत्र – 'इ', अनल – 'र' के सहित चन्द्रार्धबिन्दु–"ँ" से युक्त आपके द्वितीय बीज –– **हीं'** को जो हर समय जपा करते हैं, वे पुरुष समस्त सिद्धियों के पात्र होते हैं तथा गद्यपद्यमयी वाणी उनके मुख–कमल का कभी भी परित्याग नहीं करती।।२।।

जो व्योमार्ण वामनेत्रान्वित सानल बिन्दुकला सविशेष।
त्रिभुवनमातः! गुह्यबीज तव जपते हैं निज हृदय-प्रदेश।।
उनके वदन-कमल में होती काव्यमयी वाणी रममाण।
अर्धचन्द्रधारिणि! भयहारिणि! होते वे सब सिद्धि निधान।।२।।

इदानीं तृतीयं बधूवीजमुद्धरन्नाह शुक्रार्णमिति –

शुक्रार्णं पूतनास्थं कलितशशिकलाविन्दुभूषं सवह्नि,
भ्राजद् वामाक्षियुक्तं जननि तव बधूवीजमेतज्जपन्ति।
ते ते लोलेक्षणानां विगलितरशनापीनवक्षोजवासः
केशानां चित्तमाशु स्मरहरमहिले मोहयन्ति प्रकामम्।।३।।

टी० – शुक्रार्ण सकारः पूतना तकारस्तस्यां तिष्ठतीति पूतनास्थं कलितशशि कलाबिन्दुभूषं कलिता शोभिता या शशिनः कला चन्द्रार्धो विन्दुश्च भूषा भूषणं यस्य तत् वह्नि रेफस्तेन सहितं भ्राजद् दीप्यद् वामाक्षि दीर्घेकारस्तेन युतं युक्तम् एतावता सकार–तकार

रेफेकारमिलितं **'स्त्रीं'** इति बीजमुद्धृतं तस्यैव तन्त्रे बधूवीजमिति प्रसिद्धा संज्ञा हे जननि मातः! तव एतादृशमेतद्बीजं ये ये साधका जपन्ति ते ते जापिनः साधकाः विगलितरशनापीनवक्षोजवासः केशानां विगलितशब्दस्य प्रत्येकं योगः द्वन्द्वादौ श्रूयमाणत्वात् विगलिता स्वस्थानाद्भ्रष्टा रशना कटिभूषणं प्ररूढमदत्वात् पीनं कठिनं वक्षोजं स्तनमण्डलं तस्य वास आच्छादनं 'वस्त्रमाच्छादनं वासः', इत्यमरः वसेर्णिदित्यसुन्प्रत्ययो णित्वादुपधावृद्धिः, तदपि विगलितं विगतलज्जत्वात् विगलिताः स्वस्थानाद् विच्युताः केशा जूडापाशबन्धरहिताः कुन्तला यासां तासां लोलेक्षणानां चञ्चलचक्षुषां कामिनीनां चित्तं मन आशु शीघ्रं हे स्मरहरमहिले! शङ्करवनिते! 'वामा–वनिता महिला' इत्यमरः, प्रकामं पर्याप्तं मोहयन्ति वैचित्यमापादयन्तीति सरलार्थः। एतद्बीज–जापकस्य साधकस्य प्रमदाः स्त्रियो वश्या भवन्तीति भावः।।३।।

मंत्र के अङ्गभूत **'स्त्रीँ'** नामक तीसरे बीज तथा उसके प्रभाव को कहते हैं :–

शुक्रार्ण–'स', पूतना – 'त', शशिकला बिन्दु–'ँ' वह्नि– 'र' तथा वामाक्षि – 'ई' इन वर्णों के योग होने पर 'स्त्रीँ' बीज का उद्धार होता है। हे शिवप्रिये! जो साधक इस बीज मंत्र का अभ्यास करते हैं वे, चंचल नेत्र वाली कामिनियों को मोहित करने में पूर्ण समर्थ होते हैं। ।।३।।

जो शुक्रार्ण, पूतना, शशधर-कला, बिन्दु औ वह्नि-समेत।
वामाक्षी-युत वधू बीज को जपते हैं, कर मन-समवेत।।
उन पर विगलित रशना, दृढ़ कुच वाली, चंचलनयनी बाल।
जो हैं मुक्त केश से शोभित, मोहित वे होतीं तत्काल।।३।।

चतुर्थे कूर्चाख्यं बीजमुद्धरँस्तत्प्रभावञ्च स्फुटयन्नाह ईशानमिति–

ईशानं वामकर्णोल्लसितशशिकलाबिन्दुयुक्तं सुगुह्यं,
बीजं मातस्त्वदीयं यदि जपति जनो वारमेकं जडात्मा।
चञ्चत्पञ्चाशदुग्रग्रथितनरशिरोमालिकाक्रान्तकण्ठे!,
मातः! शैलेन्द्रकन्ये! त्रिभुवनमपि स क्षोभयत्येव शीघ्रम्।।४।।

टी०– ईशानं हकारः वामकर्ण ऊकारस्ताभ्यामुल्लसिता शोभिता या शशिनः कला चन्द्रार्धो बिन्दुश्च ताभ्यां युक्तं नादबिन्दुसहितं सुगुह्यं सुष्ठु गोपनीयं त्वदीयं बीजं "**हूँ**" इति एकाक्षरं मन्त्रं 'बीजं कूर्चाख्यमन्यद्' इत्यपि पाठान्तरम्। हे मातः! यदि जडात्मा मूर्खो जन एकं वारं सकृत् जपति चिन्तयति हे चञ्चत्पञ्चाशदुग्रग्रथितनरशिरोमालिकाऽऽक्रान्तकण्ठे! चञ्चत् स्फुरिता पञ्चाशत्संख्याका उग्रेण शिवेन ग्रथिता नराणां शिरसां मालिका तथा आक्रान्तः कण्ठो यस्याः सा सम्बोधने रूपमिदं हे पञ्चाशन्मुण्डमाला धारिणि मातः! शैलेन्द्रकन्ये हिमाचल तनये! एतन्मन्त्रजापको यः साधकः स शीघ्रं त्वरितं यथा तथा त्रिभुवनं त्रयाणां भुवनानां समाहारस्त्रिभुवनमपि निश्चयेन क्षोभयत्येव

निःसन्दिग्धं सञ्चालयत्येव, कूर्चबीजं क्षोभणात्मकं झटिति सिद्धिप्रदं कुण्डलिनीजागरणे च प्रयुज्यते साधकैरिति रहस्यम्।।४।।

चौथा 'हूँ' नामक बीजोद्धार कहते है :–

हे पचास नरमुण्डों की माला धारण करने वाली हिमालयपुत्रि! ईशान–'ह', वामकर्ण–'ऊ' चन्द्रार्धबिन्दु–'ँ' 'इन वर्णों से शोभित **'हूँ'** नाम के प्रसिद्ध बीजाक्षर को जो साधक जपता है, उसे सारे जगत् को क्षुब्ध करने का सामर्थ्य प्राप्त हो जाता है।।४।।

जो ईशान, वामकर्ण, शशिकला, बिन्दु-संयुत, अनजान।
कूर्चबीज को एक बार भी जपता है, जड़बुद्धि महान।।
हे पचास नर-मुण्ड मालिका धारण करने वाली अम्ब।
वह सचराचर त्रिभुवन को कर सकता है क्षोभित अविलम्ब।।४।।

फट्काराख्यं पञ्चमं बीजमुद्धरन्नाह पश्चादिति –

पश्चादस्त्रं तदन्यत् पुरहरमहिले! बीजमत्यन्तगुह्यं,
भालोद्यत्पञ्चमुद्रे! प्रकटविकटदंष्ट्रोग्रवक्त्रारविन्दे!
नित्यं ये भावयन्ति प्रतिदिनममले! घोररूपाट्टहासे!
ते नूनं भ्रामयन्ति त्रिजगदघहरे! चक्रवद्विश्वमेतत्।।५।।

टी०– हे पुरहरमहिले! शङ्करवनिते! पश्चात् मन्त्रस्य सर्ववर्णान्ते तदन्यद् पूर्वोक्तेभ्यो बीजेभ्योऽन्यद् भिन्नं फडिति नाम्ना अस्त्राख्यमत्यन्तं गुह्यं गोपनीयं तद् बीजं प्रसिद्धं हे भालोद्यत्पञ्चमुद्रे!

मस्तकप्रदेशे नमस्कारार्थमुद्यन्त्यः स्फुटरूपेणाविष्कृताः पञ्चमुद्राः साधकैर्यस्यैः सा भालोद्यत्पञ्चमुद्रा सम्बोधने चैतद्रूपं तदुक्तं तारारहस्ये–'प्रणमेत् पञ्चमुद्राभिः कारणाधारमुत्तमम्। ह्रीं नमो योनिमुद्रादौ क्षं नमश्च कृताञ्जलौ। व्लुँ नमः कुलमुद्रायां, ग्लौं नमो मत्स्यरूपके। ह्रौं नमः सम्पुटाकारे पञ्चमुद्राः प्रकीर्तिताः।' अथवा पञ्चमुद्रापदेन 'मस्तकप्रदेशे पञ्चकपालमिति ग्राह्यम्' प्रकटविकटदंष्ट्रोग्रवक्त्रारविन्दे! विवृतविकरालदंष्ट्रया रौद्रात्मकमुख कमले! हे अमले शुद्धे हे घोररूपाट्टहासे! घोररूपो भयप्रदोऽट्टहासो यस्याः हे त्रिजगदघहरे! त्रिजगतां पापनाशिनि! ये त्वदीयभक्ताः फट्रूपं पूर्वोक्तं मन्त्रं नित्यं सततं भावयन्ति मनसा चिन्तयन्ति ते नूनं निश्चयेन एतद् विश्वं जगत् चक्रवत् भ्रामयन्ति, इति स्पष्टार्थः। कस्मिँश्चित्पुस्तके पाठभेदेनाऽयं श्लोकः पठ्यते।

''पश्चादस्त्रं मनोस्ते हरमहिषि जना ये जपन्ति प्रकाम मोमेतद्विन्दुयुक्तं प्रकटितवदने! बीजमादौ जपन्ति। ये नित्यं भावयन्ति स्वहृदयकमले मन्त्रराजं त्वदीयं ते नूनं भ्रामयन्ति त्रिजगदघहरे! चक्रवद् विश्वमेतत्।।''

अस्मिन् ओङ्कारः सेतुरूपेणोपदिष्टोऽधिकोऽन्यत्सर्वं साम्यं तदुक्तं 'विप्राणां प्रणवः सेतु क्षत्रियाणां तथैव च। वैश्यानां चैव फट्कारो माया शूद्रस्य कथ्यते' इति प्रमाणात्प्रणवोपलक्षितानां चतुर्णां योजनं विधाय मन्त्राभ्यासः कर्त्तव्यः, इत्यर्थः। एतद्वीजाभ्यासकर्त्तुः साधकस्य कुलालचक्रवन्निखिलस्य जगतो भ्रामणसामर्थ्यमाविर्भवतीति

निष्कृष्टार्थः।।५।।

'फट्' नामक पाँचवें बीज का उद्धार कहते हैं –

हे पुरहर–महिले! हे मस्तक प्रदेश में प्रकाशित पंच कपाल रूप मुद्रावाली! हे मुख–कमल में निकली हुई विकट दंष्ट्राओं से उग्र मुख वाली! हे शुद्धे! हे घोररूपाट्टहासे! पूर्वोक्त चारों बीजों के अन्त में कहे हुए **'फट्'** नामक अस्त्र–स्वरूप अत्यन्त गुह्य बीज की जो सर्वदा भावना करते रहते हैं, उन्हें चक्र की तरह सारे संसार को घुमाने अर्थात् सारे संसार में हलचल पैदा करने का बल प्राप्त हो जाता है।।५।।

परम गुह्य तव अस्त्रबीज नित, हरबधू! जपते जो गुणवन्त।
प्रकट विकट दष्ट्रामुखकमले! भालपंचमुद्रे! अत्यन्त।।
घोर अट्टहासिनि! हे अमले! होकर वे अतिशय बलवान।
सदा घुमाया करते हैं, इस निखिल विश्व को चक्र-समान।।५।।

क्रमेण पञ्चभिः पूर्वोक्तैः श्लोकैरनेकान् प्रभावान् प्रत्यक्षरनियतस्य पञ्चाक्षर मन्त्रस्य पृथक्–पृथक् प्रदर्श्य इदानीं माया–स्त्री–कूर्चाख्यैस्त्रिविधबीजैर्मिलितैर्नीलसरस्वत्याः सर्वपुरुषार्थप्रदो मन्त्रे वर्ण्यते मायेति–

माया - स्त्री - कूर्चबीजैर्नवतपनहरित्सान्द्रचन्द्रांशुवर्णे!
मातर्नीलाख्यमेतत्तव मनुमनिशं ये प्रकामं जपन्ति।।
वित्ते वित्तेशतुल्याः शुकगुरुसदृशास्तर्ककाव्यागमादौ,
ते ते नीलाम्बुदालीरुचिरुचिरतनो! कामरूपा भवन्ति।।६।।

टी०– हे नवतपनहरित्सान्द्रचन्द्रांशुवर्णे! नवश्चासौ तपनः प्रातः–कालिकादित्य इत्यनेन रक्तवर्णो गृह्यते हरिद्वर्णः सान्द्रः पूर्णः चन्द्रांशुश्चन्द्रस्तस्य वर्णः एतेन हरिद्रक्तमिश्रितपूर्णचन्द्रवर्णे!। रक्तहरिद्योगेन नीलसदृशवर्णस्योत्पत्तिरिति वैज्ञानिकाः। अथवा नवतपनहरित्सान्द्रचन्द्रांशुवर्णे, इति नवतपनो ह्रींकारो हरित् स्त्रींकारः सार्धचन्द्रांशुः 'हूँ' एते त्रयो वर्णा यस्याः सा सम्बोधने, मन्त्रदेवतयोरभेदत्वात्। माया 'ह्रीं' स्त्रीं 'स्त्रीं' कूर्चाख्यं 'हूं' एतस्त्रिभिर्बीजाक्षरैर्नीलाख्यं नीलामाख्यातीति नीलसरस्वत्यास्ते तव मनु मन्त्रमनिशं सर्वदा प्रकामं पर्याप्तं 'काम प्रकामं पर्याप्त' मित्यमरः यथा तथा ये ये जपन्ति ते ते जापकाः। हे नीलाम्बुदालीरुचिरतनो! नीलाम्बुदानां नूतनजलधराणामाली पंक्तिस्तस्या रुचिः कान्तिरिव रुचिरा तनुः अङ्गयष्टिर्यस्याः सा सम्बोधने रूपमेतत्, नूतनमेघकान्तिसदृशसुन्दरशरीरे! एतेन झटिति साधकाभीष्टप्रदातृत्वं सूच्यते, यथा नूतनजलधरः शीघ्रं वर्षति वित्ते धने विषये वित्तेशतुल्याः कुबेरसदृशाः, तर्ककाव्यागमादौ तर्कश्च काव्यश्च आगमश्च आदिर्यस्य तदगुणसंविज्ञानो बहुव्रीहिः, आदिपदेन व्याकरणादिशास्त्रजातं तस्मिन् शुक्रगुरुसदृशा व्यासपुत्रबृहस्पतितुल्याः कामरूपाः कामसदृश सौन्दर्यवन्तो भवन्ति, अथवा कामं रूपं येषां ते कामरूपा

अनेकभवनसामर्थ्यवन्तो भवन्ति, इत्यर्थः। अक्षुण्णं पाण्डित्यं धनं सौन्दर्यमनेक भवनसामर्थ्ये च नीलसरस्वतीमन्त्राभ्यासेन भवतीति भावः।।६।।

पंचाक्षर मंत्र का पृथक्–पृथक् प्रभाव बताने के अनन्तर **'ह्रीँ' स्त्रीँ 'हूँ'** इन त्रिविध बीजों वाला श्रीनील सरस्वती का मंत्र तथा उसका प्रभाव कहते हैं:–

हे नूतन मेघ की कान्ति–सदृश शरीरवाली भगवति! जो साधक 'ह्रीँ स्त्रीं हूँ' इस नील सरस्वती के मन्त्र को सदैव जपते हैं, वे धन में कुबेर, काव्यागमादि शास्त्रों में शुक तथा बृहस्पति मे तुल्य हो जाते हैं और अनेक भव–सामर्थ्य उन्हें प्राप्त हो जाता है।।६।।

माया, स्त्री त्यों कूर्च बीज शशिकला बिन्दु संयुत अभिराम।
मातः नीलसरस्वति! जो तव मनु को जपते हैं वसुयाम।।
धन में धनपति से सब शास्त्रों में शुक-सुरगुरु से विद्वान्।
नीलाम्बुदरुचिरुचिरतनो! वे हो जाते हैं काम-समान।।६।।

एकजटातारामन्त्रमाह भवानीति –

भवान्येभिर्बीजैर्हिमगिरिसुते! चाम्रसहितै
र्निगूढं ये मातर्मनुमनुजपन्त्येकजटिले!
त्रियामानाथार्धप्रविलसतभाले! त्रिनयने!
गृहे तेषां नित्यं निवसति सदा सिन्धुतनया।।७।।

टी०– भवानि हरपत्नि! हे हिमगिरिसुते हिमाचलतनये! 'अस्त्रम्' फट्कारस्तेन सहितैर्मिलितैरमीभिः पूर्वोक्तनीलसरस्वती मन्त्रवर्णितैस्त्रिभिर्बीजैः अर्थात् **'ह्रीं स्त्रीं हूँ फट्'** इत्येकजटातारामन्त्रः हे मातः! एकजटिले! एतादृशं मनुं मन्त्रं निगूढ़ नितरां गुप्तं यथा तथा येऽनुजपन्तिं अभ्यस्यन्ति हे त्रियामानाथार्धप्रविलसितभाले! त्रियामानाथश्चन्द्रस्तस्यार्धस्तेन विलसितं भालं यस्याः चन्द्रार्धशोभितमस्तके! हे त्रिनयने! त्रीणि नयनानि यस्याः सम्बोधने त्रिनयने! तेषां जापकानां गृहे गेहे नित्यमपिच्छेदरहितं सदा सर्वदा सिन्धुतनया लक्ष्मीः निवसति निवासं करोतीत्यर्थः। एकजटामन्त्रजपासक्तमनसां साधकानां सामीप्यं श्रीः सर्वदा भजतीति भावः।।७।।

एकजटा तारा का मंत्र कहते हैं –

हे भवानि! श्री नीलसरस्वती के मंत्र में फट्' नामक अस्त्र को मिलाकर, जो एकजटा तारा के मंत्र –**'ह्रीं स्त्रीं हूँ फट्'** को जपते हैं, उन साधकों के घर में निश्चल भाव से लक्ष्मीवास करती है।।७।।

हिमगिरिसुते! भवानि! अस्त्रयुत इन बीजों को जो सप्रेम।
मातः एकजटे! तव मनु को विधिवत् धारण करके नेम।।
बालचन्द्रचूड़े! त्रिविलोचनि! जपते हैं नित बारम्बार।
उन भक्तों के घर करती हैं सागर-तनया सदा बिहार।।७।।

श्रीतारामन्त्रमुद्धरन्नाहामीभिरिति–

अमीभिर्बीजैस्ते प्रणवसहितैः शैलतनये।
निजस्वान्ते चास्रं परिजपति पञ्चाक्षरमिति।
स साक्षात् ते न्यासी स तु पुरहरोऽसौ मुरहरः,
स धाताऽसौ योगी भवति हि चिदानन्दरसिके!।।८।।

टी०– हे शैलतनये हिमाचलकन्यके! यः कश्चित्साधकः प्रणवसहितैः ॐ कारयुक्तैरमीभिर्नीलसरस्वतीमन्त्रावयवप्रसिद्धै स्त्रिभिर्बीजैः **"ह्रीं स्त्रीं हूँ"** इत्याकारकैस्तथा फट्मन्त्रसहितैकजटामन्त्रेण च सहितं पञ्चाक्षरमिति नान्ना प्रसिद्धं: ते तव श्री तारामन्तं निजस्वान्ते स्वमानसे "स्वान्त ह्रन्मानसं मनः" इत्यमर **"ॐ ह्रीं स्त्रीं हूँ फट्** इत्याकारकं परिजपति मनोव्यापारेण अभ्यस्यति "जपमानसे च" इति स्मरणात् स महापुरुषस्ते तव न्यासी न्यासतत्वज्ञः (न्यासानां विशेषस्तारारहस्ये कुलार्णवे च प्रसिद्धं षोढादिक्रमेण) संन्यासीति पाठान्तर तेन ब्रह्मविद् ग्राह्यः "ब्रह्मवेद ब्रह्मैव भवति" इति श्रुतेः अभ्यर्हितत्वात्प्रथम ब्रह्मादिभ्योऽत एव प्रोक्तं स तु पुरहरः शिषवोऽसौ साक्षात् मुरहरो विष्णुः स धाता ब्रह्म हि निश्चयेन हे चिदानन्द रसिके ब्रह्मानन्दरसज्ञे! स योगी योगतत्त्ववेत्ता भवतीति सरलार्थः। श्रीतारा साधकस्त्रिदेवसाम्यं प्राप्य सर्वपाशैर्मुक्तः सन् ब्रह्मरूपो भवतीति तात्पर्यम्।।८।।

अष्टाभिः श्लोकैमन्त्रतत्त्वं श्रीतारायाः प्रतिपादितं तत्सर्व तारातन्त्रे

प्रसिद्धं दैवतछन्दःस्वरर्षिन्यासादिज्ञानं बिना वैगुण्यापादकत्वाज्जपो निरर्थकोऽनिष्टकारकश्च श्रुतस्तस्मात्तदसफलीकर्तुं संक्षेप तस्तत्प्रदर्श्यते। तारातन्त्रे विद्यास्वरूपमेवमाह प्रणवं पूर्वमुद्धृत्य ह्रल्लेखां कुलकामिनीम्। कूर्चमस्त्रं मन्त्रराजो देवद्रुम इवापरः (प्र.प्र. ६) इयमेव श्रीतारामहाविद्यामन्त्रराजोऽप्ययमेव नीलसरस्वतीविषये प्रोक्तं 'पूर्वोक्तमन्त्रराजस्य मध्यबीजत्रय प्रिये। कुल्बुका नाम देवी सा महानीलसरस्वती।। एकैव सा महादेवी नाममात्रं त्रिधा भवेत्। प्रणवं व्यतिरेकेन तृतीयैकजटा भवेत्।। यथा पञ्चाक्षरीत्र्यर्णा तथा वर्णचतुष्टयम्। माहात्म्येन च भेदः स्यात् साम्यमित्यभिधीयते (ता ५ प १८/१६/२०) एषु श्लोकेषु स्तोत्रोक्तविद्यात्रयरहस्यं पूर्णतः समाविष्टं तारारहस्ये साधनप्रकारादि यथा वर्णितं तथा प्रकटी क्रियते।

अथ एकजटाप्रकरणम्

तारकत्वात्सदा तारा तस्य भेदविभेदतः। आद्याकल्पे मुक्तकेशी रुद्रस्त्वैकजटः स्वयम्।। आस्माच्चैकजटा प्रोक्ता मन्त्रश्चास्या निरूप्यते। वसिष्ठाराधिता विद्या न तु शीघ्रफला यतः।। अतस्तेनापि मुनिना शापो दत्तः सुदारुणः। ततः प्रभृति विद्येयं फलदात्री न कस्यचित्।। तत्तदुद्धारितं तेन शिवेन गुरुणा स्वयम्। लज्जाबीजं वधूबीजं कूर्चबीजमतः परम्।। अस्त्रान्तमनुना ख्यातं पञ्चरश्मिस्वरूपकम्। इति चैकजटा विद्या सर्वतन्त्रेषु गोपिता। सर्वशास्त्रे गोचरा च कामिनी सिद्धिदायिनी। महापातकलक्षेण क्षितौ

यदि च मानवः। एतस्य श्रवणाद्देवि! जीवन्मुक्तो भवेद्ध्रुवम्। श्रीतारा नैव दातव्या भूमिस्वर्गरसातले।। यदि प्रदीयते देवि! निरये पच्यते ध्रुवम्। ज्येष्ठपुत्राय शान्ताय स्वरूपज्ञानशालिने।। श्रीयुतां यदि राधेत शूद्रोमोहवशं गतः। तारकाद्यां महाविद्यां पतनं तस्य निश्चितम्।। स्त्रीणां चापि वरारोहे! निषिद्धं सर्वदैव हि। आदौ श्रीएकजटा उद्धारिता ततः श्रीतारा नोक्ता सर्वत्र दोषश्रवणात् स्वीयधर्मत्वाच्च। श्रीबीजाद्या यदा विद्या तदा श्रीः सर्वतोमुखी। वाग्भवाद्या यदा विद्या वागीशत्वप्रदायिनी। पञ्च रश्मिर्महाविद्या लभ्यते यदि भाग्यतः। तस्य भोगश्च मोक्षश्च करस्य एव शंकर।। इत्येकजटादेव्या शक्ति सिद्धि मन्त्रः। लज्जाधा चापरा चासौ भोगमोक्षप्रदायिका। सार्धपञ्चाक्षरं मन्त्रं शक्तिसिद्धिप्रदायकम्। एतस्या गायत्री। **(ॐ तारायै विद्महे मोक्षदायै धीमहि तन्नो नीले प्रचोदयात्)** इति तारामन्त्रगायत्री। कामाख्या चापरा देवी काम तारा प्रकीर्तिता। भोगमोक्षप्रदा देवी सर्वशास्त्रे प्रपूजिता। इति कामतारामन्त्रः। अस्या गायत्री तत्रैव। **ॐ कामाख्यायै विद्महे कुलकौलिन्यै धीमहि तन्नः श्यामे प्रचोदयात्, इत्येकजटाभेदः।।**

उग्रताराप्रकरणम्

कूर्चाद्या पञ्चरश्मिर्या, विद्या ख्याता महीतले। उग्रतारा समाख्याता स्वर्गे मर्त्ये रसातले।। अस्यास्तु स्मरणात्सद्यः सर्वपापैः प्रमुच्यते। भोगमोक्षप्रदा देवी सर्वतन्त्रेषु पूजिता। अस्या गायत्री। **ॐ उग्रतारे विद्महे सिद्धिसारे धीमहि तन्नो नीले प्रचोदयात्।**

मन्त्रः– वधूलज्जा ततः कूर्चमस्त्रान्तोऽयं महामनुः। शम्भुपत्नी समाख्याता सर्वतन्त्रेषु गोपिता (अस्या गायत्री) **ॐ शम्भुपत्न्यै विद्महे महोग्रायै धीमहि तन्नस्तारे प्रचोदयात्।** इति आदौ कूर्चं ततो लज्जां बधूबीजमतः परम्। फडन्तश्च महामन्त्रः सर्वतन्त्रशुभावहः। महाकालप्रिया देवी भोगमोक्षप्रदायिनी। **हूँ ह्रीं स्त्रीं फट्।** एतस्या गायत्री **ॐ तारकायै विद्महे महाकालप्रियायै धीमहि तन्नः शक्तिः प्रचोदयात्।।**

नीलसरस्वतीप्रकरणम्

ताराद्येकजटामन्त्रो नीलवाण्याः प्रकीर्तितः। यस्यास्तु स्मरणात्सम्यग्वागीशत्वं लभेद्ध्रुवम्। अस्य गायत्री **ॐ नीलसरस्वत्यै विद्महे श्रीतारायै धीमहि तन्नो देवि प्रचोदयात्।** वाग्भवाद्या चैकजटा महानीलसरस्वती। अस्याश्च स्मरणात्सद्यः सर्वसिद्धीश्वरो भवेत्। **ॐ नीलसरस्वति विद्महे शारदायै धीमहि तन्नः शिवे प्रचोदयात्।**

कुल्लुकाप्रकरणम्

कुल्लुकाविद्यामन्त्रस्तु सर्वत्र प्रयोगे पद्मावती च। लज्जाबधूः कूर्चबीजप्रयोगः सिद्धिदायकः। कुल्लुकेयं समाख्याता सर्वतन्त्रेषु गोपिता। प्रणवं पूर्वमुद्धृत्य पद्मे–पद्मे ततः पदम्। महापद्मे पदं प्रोच्य पद्मावति पदं ततः। माये स्वाहा महामंत्र–प्रयोगः सिद्धिदायकः। **'ॐ पद्मे महापद्मे पद्मावति श्रीं ह्रीं स्वाहा।** अत्र शास्त्रे माये

इति श्रवणाल्लज्जाद्वयं बोध्यम्। तारानिगमे पद्मावतीप्रकरणे–तारं पद्मे च पद्मे च महापद्मे ततः परम्। पद्मावति ततो लज्जाद्वयं स्वाहा ततो मनुः। तारकत्वात्सदा तारा या काली सैव निश्चिता। बहवोऽस्याश्च मन्त्राः स्युः सर्वतन्त्रागमा–दिषु। शक्तिसिद्धा महाविद्या सारात्सारतराः स्मृताः। आद्या चैकजटा प्रोक्ता द्वितीया चोग्रतारका। तृतीया नीलवाणी स्याद्भोग–मोक्षप्रदा मता। अष्टविद्यासमोनास्ति भूतले सिद्धिदो मनुः। एतासां सर्वमन्त्राणां देवतास्त्रितया मताः। उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता। दत्ता वाक् नीलया यस्मात्तस्मान्नीलसरस्वती। इति।

एतासामष्टमन्त्राणाम् ऋषिछन्दांसि साधक! ।।श्रृणु चात्र प्रवक्ष्यामि रहस्यं मम सम्मतम्। नीलाचारादिक दृष्टवा पुरश्चरणमेव च। प्रत्येकं च प्रवक्ष्यामि अष्टमन्त्रश्च तारके। अक्षोभ्योऽस्य ऋषिः प्रोक्तो बृहतीच्छन्द एव च। बीजं लज्जामनुः प्रोक्तं शक्तिः कूर्चमितीरितम्। कीलकं निजबीजं च बधूबीजं सुसिद्धिकम्। लक्षसंख्यं जपेन्मन्त्रं फलमूलैर्वने वसन्। नक्तं ताम्बूलपूर्णास्यः शक्तिसङ्गकुले रतः। तत्र शिवेन ब्रह्मानन्दरतं प्रपञ्चितम्। नीलपद्यैश्च जुहुयान्मधुरेण च। आद्या मन्त्रे तद्भेदे च सर्ववर्णेष्वयं विधिः। उग्रतारा मनौ वत्स! विधिरेष न संशयः। लक्षद्वयं च तद्भेदे पुरश्चरणकर्मसु। नीलवाणी नीलकल्पे मन्त्रभेदसमन्विते। लक्षद्वयं जपेन्मन्त्रं तदा सिद्धिरनुत्तमा। सर्वतारासु विद्यासु पुरश्चरणंकर्मसु जुहुयान्नील पद्मैश्च विल्वपत्रैरभावतः। जपमन्त्रे च तारायाः साधने

शक्तिजं कुलम्। वीरभावरहस्योक्तं त्यक्त्वा साकारमाप्नुयात्। इति तारारहस्योक्त प्रकारः, तारा तन्त्रोक्तमुपरिष्टाद्वक्ष्यामः।

अब श्री तारा पंचाक्षरी विद्या को कहते हैं :–

हे शैलपुत्रि! जो साधक ओंकार युक्त एकजटा तारा के मंत्र को मिलाकर **"ॐ ह्रीं स्त्रीं हूँ फट्"** – इस पंचाक्षर महाविद्या को अपने मन में जपते हैं, वे ब्रह्मवेत्ता हो जाते हैं तथा ब्रह्मा, विष्णु और शिव की साम्यता प्राप्त करते हुए सब पाशों से मुक्त होकर ब्रह्मरूप हो जाते हैं।।८।।

शैलबालिके! एकजटा के मनु में प्रथम प्रणव मतिमान्।
योजित करके, जो पंचाक्षर मन्त्रराज जपता सज्ञान।।
वह साक्षात् तव न्यासी है, वह विधि है, हरि है, हर है, और
चिदानन्दरसिके! वह ही है जीवन्मुक्तों का सिरमौर।।८।।

मन्त्रभेदं प्रदर्श्य, इदानीं ध्यानं कथयति यतो 'ध्यानं विना भवेन्मूकः' इति वचनात्, साधनायां ध्यानतत्त्वमावश्यकमत आह शवासीनामिति–

शवासीनां कण्ठे कलितनृकरोटीं करलसत्-
कपालासिश्यामोत्पलरुचिरकर्त्रीं त्रिनयनाम्।
नवाम्भोदश्यामां विकटरदभीमां पृथुकुचां,
सदैव त्वां ध्यायन् जननि! च जड़ो वाक्पतिसमः।।९।।

टी०– हे जननि मातः! शवासीनां प्रेतोपरि कृतासनां कण्ठे कण्टप्रदेशे कलिता शोभिता नृकरोटी मनुष्यशिरोऽस्थिसमूहस्रङ् माला यस्यास्तां करलसत्कपालासिश्यामोत्पलरूचिरकर्त्री करेषु चतुर्षु हस्तेषु क्रमेण लसत् शोभितः कपालः कपालपात्रं लसच्छब्दस्य प्रत्येकं योगो द्वन्द्वादौ श्रुतत्वात् असि खड्गं श्यामोत्पलं नीलकमलं रुचिरा मनोहरा कर्त्री, आयुधविशेषो यस्यास्तां त्रिनयनां चन्द्रसूर्याग्निनेत्रात्मिकां नवाम्मोदश्यामां नवाम्भोदो नूतनजलधर इव श्यामां नीलवर्ण्ण विकट रदभीमां विकटा भयजनका रदा दन्तास्तैर्भीमां भयङ्करीं पृथुकुचां कठिनोन्नतस्तन मण्डलां त्वामीदृक्स्वरूपिणीं ध्यायन् चिन्तयन् जड़ोऽपि मूढ़ोऽपि वाक्पतिसमो बृहस्पतितुल्यस्तव साधको भवतीति शेषः। ध्यानभेदश्चैवम्–

प्रत्यालीढपदार्पिताङ्घ्रि शवहृद्घोराट्टहासापरा
खड्गेन्दीवरकर्त्रिखर्परभुजा हूँकारबीजोद्भवा।
खर्वानीलविशालपिङ्गलजटा जूटैकनागैर्युता
जाडयन्यस्य कपालके त्रिजगतां हइन्त्युग्रतारा स्वयम्।।

ध्यानमाहात्म्यं चोक्तम्–'यथा ध्यानस्य संसर्गात्कीटको भ्रमरायते। तथा समाधियोगेन ब्रह्मीभूतो भवेन्नरः।' पञ्चदश्यां च 'अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने। पश्यन्नपि न चेद् ध्यायेत् कोऽपरोऽस्मात् पशुर्वद (ध्यादी०१५६) ।।६।।

श्री तारा–विद्या के तीन भेदों को कहकर ध्यान का उपदेश

करते हैं –

हे जननि! जो साधक, प्रेतासन पर आरूढ़, कण्ठ में मुण्डमाला धारण किये हुए, चारों हाथों में कपाल, खड्ग, कर्त्री और नील कमल लिये हुए, तीनों–नेत्रों से युक्त, विकट दाँतों से भयानक, उन्नत स्तन मण्डल, नूतन मेघ की कान्तिसदृश शरीर की कान्ति वाली तुम्हें ध्यान करते हैं, वे यदि जड़–मूर्ख भी हों, तो भी बृहस्पति के तुल्य हो जाते हैं।

प्रेतासन आरूढ़, कण्ठ में शोभित नर मुण्डों की माल।
कर में खड्ग, कपाल, कर्त्रिका, नीलकमल त्रिनयन सुविशाल।।
नूतन घनश्याम-सी तनु-छवि, विकट दन्त, भीमा, कुचपीन।
वह वाक्पति होता तुमको यों ध्याता, जो जड़बुद्धि मलीन।।६।।

इदानीं पुरश्चरणात्मकं मन्त्रसाधनप्रकारमाह तट इत्यादि–

तटे नद्याः सिन्धोर्गिरिशिरसि मालूरगहने
श्मशाने गोष्ठे वा गिरिशभवने शून्यसदने।
हविष्याशी लक्षं प्रजपति वशीभावनपरः
स सर्वज्ञो वाग्मी भवति सुघनापीनजघने! ।।१०।।

टी० – हे सुघनापीनजघने! नद्यास्तटे नदीकूले सिन्धोः समुद्रस्य च तटे गिरिशिरसि पर्वतमस्तके मालूरगहने मालूरो बिल्वः 'बिल्वे शाण्डिल्यशैलूषौ मालूर–श्रीफलावपि'–इत्यमरः। तस्य गहनं वनं

विल्ववृक्षसंकुले स्थाने श्मशाने पितृकानने गोष्ठे गवां स्थाने वा अथवा गिरिशभवने शिवालये शून्यसदने एकान्ते स्थाने हविष्याशी हविष्यभोजनो वशी जितेन्द्रियो भावनपरोध्याननिष्ठः सन् यः साधको लक्षं लक्षसङ्ख्याकं मन्त्रं जपति स सर्वज्ञः सर्वशास्त्रज्ञानवान् तथा वाग्मी प्रशस्तवक्ता च भवति 'वाचोग्मिनि' रिति स्मरणात् पुरश्चरण विपये प्रोक्तं "जीवहीनो यथादेही सर्वकर्मसु न क्षमः। पुरश्चरण हीनोऽपि तथा– मन्त्रः प्रकीर्तितः। सकृद् द्विधा त्रिधा वाऽपि चतुर्धा युगभेदनः। कर्त्तव्यं च प्रत्यत्नेनपुरश्चरणमुत्तमम्।" स्तोत्र कवच सहस्रनामादीनामपि पुरश्चरणं तन्त्रे प्रतिपादितं तदपि प्रदर्श्यते–सहस्रनामस्तोत्रेषु कवचेष्वपि पार्वति! तत्र तत्रोदितो या हि सा वै कार्या पुरस्क्रिया। यत्र नोक्ता पुरश्चर्या तत्रैव तु विधीयते। अयुतं तत्पुरश्चर्या स्तोत्रमात्रे प्रकीर्तिता। स्तोत्रमध्ये स्थितं यद्यत् तत्सर्वे स्तोत्ररूपकम्। फलस्तुत्यादिकं देवि! अङ्गमित्यभिधीयते।। आद्योपान्तं बिना देवि! फलमर्धप्रकीर्तितम्। अत्रार्थे प्रत्ययो देवि! षडङ्गाद्या यथा स्मृताः। हवनं कवचादीनां श्लोकान्ते विहितं तथा। अद्योपान्तं पठित्वा वा पश्चात्तु हवनं मतम्। अथवा देवदेवेशि! नामान्ते हवनं भवेत्। उपक्रमोपसंहारे श्लोकान्ते हवनं मतम्। आदौ पूर्णं तु सम्पठ्य तथैवान्ते महेश्वरि!। मध्ये नामानि पाठ्यानि पुरश्चर्या यथा भवेत्। तर्पणे चाऽभिषेके च कुर्यादेवं महेश्वरि! ।इति। स्तोत्रपाठेऽपि नियमस्तथाऽऽह च विश्वसारे–ऋषिच्छन्दोदेवतादि न्यस्य स्तोत्रं पठेद्यदि। न्यासं बिना कृते देवि! भवेत्तुच्छफलं यतः। न्यासप्रकारः। ऋषेर्न्यासो मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे। देवता

हृदये चैव बीजं तु गुह्यदेशके। शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं मतम्। श्रीतारामन्त्रस्य सामान्यो जपविधिस्त्वेवम्–सहस्रं प्रजपेन्मन्त्रं धर्ममोक्षार्थसिद्धये। अष्टोत्तरशतं यत्तु तत्पूजायाः फलाप्तये। विंशतिश्च जपेन्मन्त्रं पूजासिद्धयर्थमेव हि। पूजनेतरजपे तारासारे–यावन्न क्रियते कर्म पुरश्चरणमुत्तमम्। तावन्नैव प्रजप्तव्यं सहस्रादधिकं शिव!।। प्रजपेत्साधको यस्तु क्षोभयुक्तोऽप्यनन्यधीः। सहस्रादधिकं वत्स! सहस्रेषु समर्पयेत्। पुरश्चरणहीनानां कृते। सहस्रं प्रजपेन्मन्त्रं पुरश्चरणकर्मणि। शतं तेन प्रजप्तव्यं ह्यधिकं न कदाचन। तारातन्त्रे श्रीताराविद्याया ऋष्यादिकमेवमाह–अक्षोभ्यश्च ऋषिः प्रोक्तो वृहती छन्द ईरितम्। उग्रतारा देवतोक्ता कूर्चबीजमुदाहृतम्। शक्तिरस्त्रं शेषवर्णाः कीलकानि भवन्त्युत। (२ प ५,६) पूर्वोक्तक्रमेणेयानेव विशेष इति।।१०।।

पुरश्चरण–रूप मन्त्र का साधन कहते हैं :–

हे कठिन स्थूल जघन–प्रदेशवाली देवि! जो साधक हविष्यभोजी, जितेन्द्रिय, ध्यान–निष्ठ होकर, नदी के तट पर, समुद्र के तट पर, पर्वतशिखर पर, विल्वबन में, श्मशान में, गोशाला में, शिवालय में तथा एकान्त स्थान में, लक्ष संख्या में मन्त्र जपता है, वह पुरुष सर्वज्ञ तथा सुवक्ता हो जाता है।।१०।।

गिर-शिर पर, श्रीफल-काननमें, सिन्धु-किनार, सरिता-तीर।
गोष्ठ,-शिवालय-प्रेतभूमि में, शून्य-सदन में जो-'बलवीर'।।
हविष्यान्नाभोजी, इन्द्रियजित होकर मनु जपता है लक्ष।
होता वह सर्वज्ञ सुजघने! मातः! वाक्य-विचक्षण दक्ष।।१०।।

तर्पणं प्रतिपादयन्नाह मुदेति–

मुदा मातः! शुद्धोदकरुचिरगन्धाक्तसलिलैः
स्वयम्भूपुष्पस्रक्कुलतनुभगक्षालनजलैः।
शिवे त्वां सन्ध्यायन् हरमहिषि! सन्तर्पयति यः
सदैव स्त्रीवृन्दं वशयति स विद्याधरपतिः।।११।।

टी०– हे हरमहिषि! शङ्करपत्नि! यः साधकः शुद्धोदकरुचिर गन्धाक्तसलिलैः शुद्धजले रुचिरेण रुचिवर्धकेन गन्धेन आक्तानि मिश्रितानि सलिलानि विशेषशाक्तद्रव्याणि द्रवत्वसाम्यात्सलिलानि तैस्त्वां सन्ध्यायन् सम्यक् चिन्तयन् मुदा हर्षयुक्तेन मनसा सन्तर्पयति सदैव स्त्रीवृन्दं वशयति देवाङ्गनाः स्वाधीनं करोति तथा स विद्याधराणां देवयोनिविशे–षाणां पतिः स्वामी च भवति, इति वाह्यं तर्पणं स्वयम्भूपुष्पस्रक्कुलतनुभगक्षालनजलैरित्यनेनान्तस्तर्पणमुच्यते उभयार्थस्य च सम्भवात् स्वयम्भूपुष्पाणां स्रक्माला तथा कुलस्य तनुः कुलं शक्तिः, अकुलः शिव इति सङ्केतः, अत एव कुलपदेन शक्तितत्त्वं कुलतनुः सार्धत्रिवलया कुण्डलिनी शक्तिः कुण्डे आधारचक्रे लीयत इति व्युत्पत्तिदर्शनात् 'स्वपिषि कुलकुण्डेकुहरिणि' इति भगवत्पादाचार्याः। स्वयम्भूलिङ्गेन वेष्टिता सा भगाकारवती त्रिकोणाकारेति प्रसिद्धा तस्याः क्षालनं शोधनं तदर्थं जलैः जलस्थानीयैभावनाविशेषैस्त्वां यस्तर्पयति तस्यापि पूर्वोक्तं फलं भवति। ध्यानं तर्पणं च प्रोक्तं सर्वतेजोमयीं देवीं शिवशक्तियतात्मिकाम्। भावयेत्साधको यस्तु ध्यानयोगेन निश्चलः। इति ध्यानं विधातव्यं

साधकैर्मन्त्रसिद्धये। ब्रह्मरन्ध्रचन्द्रपात्रात्तर्पयेत् तारिणीं पराम्। तत्रस्थं सूर्यपात्रेण चार्घ्ये दद्यान्मोहरम्। स्वयम्भूपुष्पपदेन अन्यानि दशपुष्पाणि संग्राह्यानि तेषां सर्वेषामुपलक्षणं चैतत् तदुक्तं–दया–ज्ञान क्षमा पुण्यं पुष्पमिन्द्रियनिग्रहम्। ज्ञानदानं पुण्यपुष्पमहिंसापुष्पमुत्तमम्। आनन्दपुष्पं मे देवि! स्वयम्भूपुष्पमुत्तमम्। दश पुष्पं यः प्रदद्यात् स गच्छेत् तारिणीपदम्। एषां पुष्पाणां भावना विशेषक्रमेणार्पणं मालापदेनाभिहितं वाह्येऽपि सम्भवः स्वयम्भूतानि न केनापि निर्मितानि आरण्यकानि इति वा अनेनान्तर्यागषट्चक्रभेदनादिरहस्यानामपि ग्रहणम्। उभयविधस्य तर्पणस्य कर्त्तुः साधकस्य देवाङ्गनानां वशीकारत्वं विद्याधरपतित्वं च सिध्यतीति निर्गलितोऽर्थः।।११।।

तर्पण–विधि कहते हैं–

हे शिवपत्नि! जो शुद्ध जल से सुन्दर गन्ध से वासित शाक्त द्रव्यों से स्वयम्भू पुष्प की माला–द्वारा त्रिकोणाकार यंत्र के क्षालनार्थ जल से तुम्हारा ध्यान करते हुए तर्पण करते हैं, वे देवस्त्रियों को वशीभूत करने का सामर्थ्य प्राप्त करते हैं या सर्वदा स्त्री–वृन्द मात्र को अपने अधीन करते हैं और विद्याधरों के पति हो जाते हैं।।११।।

शुद्ध तोय गंधाक्त सलिल त्यों रक्त स्वयम्भू पुष्प विशेष।
कुलतनुभग-प्रक्षालित जल से मातः! घर तव ध्यान हमेश।।
तर्पण करते हैं विधि पूर्वक, प्रमुदित मन से जो योगीश।
उनके वश सुन्दरियाँ होतीं, होते वे विद्याधर-ईश।।११।।

तर्पणविधिमुक्त्वा पूजाविधिमाह जपापुष्पैरिति –

जपापुष्पैर्बिल्वैर्मरुबकुलमुख्यैश्च कुसुमैः
सुगन्धैः कर्पूरैरगरुसहितैर्धूपनिकरैः।
प्रदीपैरुज्जवालैर्घृतरचितनैवेद्यनिकरै-
स्तवार्चां यः कुर्यात् स भवति हि पूज्यः क्षितिपतेः।।१२।।

टी०– यः साधक उपासको जपापुष्पैः ओड्रपुष्पैः 'गुडहल' इति प्रसिद्धैः बिल्वैबिल्वदलैः मरुः मरुबको नामैकदेशग्रहणे नामग्रहणमिति न्यायात् बकुलो मुख्यः प्रधानं येषां तैः कुसुमैः पुष्पैः सुगन्धैः सुष्ठु आमोदयुक्तैरगरुसहितैः सुगान्धिद्रव्यविशेषै–धूपैर्धूपसमुदायैः कर्पूरैश्च उज्ज्वालैः प्रदीप्तैः प्रदीपैस्तथा घृतरचितैघृत–निर्मितैर्नैवेद्य निकरैर्ननाव्यञ्जनैस्तव अर्चा पूजां कुर्यात् स क्षितिपते राज्ञः पूज्यो हि निश्चयेन भवतीति। पूजैव पूज्यत्वं नयतीति भावः।।१२।।

पूजा विधि कहते हैं –

हे भगवति! जो साधक गुड़हल, बिल्व–दल, मरुवा, मौलसिरी आदि उत्तम पुष्पों से, सुन्दर अगर आदि सुगन्ध द्रव्य विमिश्रित धूप से, कपूर प्रदीप्त दीपकों से, घृत–निर्मित विविध भाँति के व्यंजनों से, तुम्हारी पूजा करते हैं, वे निश्चय पूर्वक राजाओं के पूज्य होते हैं।१२।।

कुसुमैः
धूपनिकरैः।

पतेः।।१२।।

गुडहल' इति
ामग्रहणमिति
सुगन्धैः सुष्ठु
दायैः कर्पूरैश्च
निर्मितैनैंवेद्य
ज्ञः पूज्यो हि
१२।।

वा, मौलसिरी
व्य विमिश्रित
विध भाँति के
राजाओं के

जपापुष्प, मरु, बकुल, बिल्व-दल, नव कमलों के सुरभित फूल।
कर्पूरागरु-सहित धूप से, उज्ज्वल दीपों से मुदमूल।।
घृत-निर्मित बहुभाँति व्यंजनों से जो पूजन करै महान्।
हो जाता वह पूज्य जगत में, पाता भूपतियों से मान।।१२।।

पूजाविधिमुकत्वा अधुना होमप्रकारमाह स दुर्वाभिरिति–

स दूर्वाभिः पद्मैस्त्रिमधुललितैः श्रीफलदलै-
र्घृतैर्गव्यै रक्तैः सुकुलभगलिङ्गामृतरसैः।
त्रिकोणे कुण्डे यो हुतवहमुखे होमविधिना
जुहोति त्वां मातः। स भवति कवीन्द्रः क्षितिपतिः।।१३।।

टी०– स दूर्वाभिर्दूर्वामिश्रितैः त्रिमधुललितैः 'घृत–क्षौद्र–सिताः' त्रिमधुशब्देन प्रसिद्धाः त्रिमध्वाक्तैः पद्मैर्नीलकमलैः श्रीफलदलैर्बिल्वपत्रैश्च सुकुलभगलिङ्गामृतरसै रक्तै रक्तवर्णतामापन्नैर्गव्यैर्गोविकारैः 'गोपयसोर्यत्' इति यत्प्रत्ययः, घृतैराज्यैर्होमविधिना होमप्रतिपादकशास्त्रेण त्रिकोणे कुण्डे हुतवहमुखे संस्कृताग्नौ हे मातः! यस्त्वां ध्यायन् जुहोति आहुतिद्रव्यं प्रक्षिपति स कवीनां काव्यकर्तृणामिन्द्रो राजा तथा क्षितेः पतिः स्वामी भवतीति सरलार्थः।

सुकुलभगलिङ्गामृतरसैरिति पदं व्याख्यायते– त्रिपुरासारसमुच्चयेप्रोक्तं–निःशङ्कहरिणाङ्कमम्बरतलात्पातालमूलं गतं, तत्र स्थितेन दिवाकरेण पुटितं कृत्वा समादायच। राहोरास्यगतं

कपालिकरणप्रस्तावनापण्डितः, कुण्डे हस्तकरण्डकेन जुहुयाद् होमोऽयमत्यद्भुतः (६,७) गोविन्दराजेनेत्थं व्याख्यातम्–इरिणाङ्कः इडानाडीस्थवायुः कार्ये कारणोपचारात् अम्बरतलान्नासास्थानात् पातालमूलं मूलाधारं ब्रह्मरन्ध्रगतं तत्रस्थेन दिवाकरेण पिङ्गलवायुना पुटितमुभयोरैक्यं कृत्वा तं वायुमादाय राहोरास्यगते कुण्डलीमुख हस्तकरण्डेन हस्तरूपस्रवेण मनसा जुहुयात् कपालिकरणप्रस्तावना पण्डितः कपालिकरणप्रक्रियायां प्राज्ञः ऊर्ध्वाधःकरणं विन्दुरित्यत्र पण्डितः गुप्तार्थस्तु किञ्चित्प्रकाश्यते– हरिणाङ्कद्रव्यविशेषः स्थानं विशेषः स्थानविशेषगतं स्थानविशेषे हस्तकरण्डकेन हस्तरूपस्रुवेण जुहुयात् द्रव्यसंज्ञा अप्रकाश्या एतदर्थकथने शिष्टोपहास इति तन्त्रचूड़ामणिश्च राहुशिरः शिरोवा गृहीत्वा क्षाडेन विशेत् सूर्यास्यांकं समादातुं यदा तस्यां तिथौ युते पातालगम्या देवेश! व्योमस्थानाद्दिवाकरम्। पतितं राहुचक्रे तु बुद्धयैक्यं प्रापयेत्ततः।। राहुवक्त्रेण तत्कुण्डे होमं कुर्य्यात्तु तदिने। तत्र यज्ज्ञायते द्रव्यं तदेव कुण्डगोलकम्।। कुण्ड शिवसहायेन गोलकं शिवहंसतः। एतत्त्रयाणां मध्ये तु स्वयम्भूकुसुमं महत्।। केचिद्गन्धर्वराजेन लभ्यते वा न वा विभो!।। यदि तल्लभ्यते देवि! लाक्षारससमन्वितम्।। कस्तूरीं कुङ्कमाक्तां च वर्टीं कृत्वा तु गोपयेत्। मन्त्रराजं समालिख्य प्रयोगं तेन निर्वपेत्।। तत्तिथिं समनुप्राप्य स्वयमुत्तिष्ठते कुलम्। अमृतं चोभयोर्देव! भोक्तुं देवी न संशयः।। सुप्तादिदोषदुष्टायमन्त्रा विद्याश्च कीलिताः। प्रबुद्धास्तत्प्रयोगेण यावत्सा पुनरागता।। द्वितीयायां गते देवि! दृश्या या सा कलावती। तिथिक्रमेण सा देवी पौर्णमास्याः

फलप्रदा इति एतदर्थप्रकाशेन देवताशापो जायते तत्कर्थ बहुसूचितमिति। तारारहस्ये–'भगलिङ्गामृतपदेनेदमेव गृहीतं मुदेत्यादिनाऽत्रापि च प्रोक्तं तन्त्रान्तरे होमस्याध्यात्मिकप्रकारोऽपि 'मूलाधारगते देवि! देवाताग्निसमुज्ज्वले। धर्माऽधर्मान्विते त्र्यस्रै र्मूलमन्त्रपुरःसरम्।। अहं जुहोमि स्वाहेति प्रत्येकं जुहुयात् 'सुधीः। अहंता सत्यपैशुन्यकामक्रोधादिकं हविः।। मन एव स्रुवः प्रोक्तः उन्मनी स्रगुदीरिता' इत्यादि 'ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना' इति भगवद्वचनाच्च।।१३।।

होम–विधि कहते हैं–

हे देवि! दूर्वा, कमल, त्रिमधु (शर्करा, घी, मधु) विल्वपत्र, गो का घी तथा सुकुल भगलिङ्गामृत नामक रक्त द्रव्यों से जो, त्रिकोणाकार कुण्ड में होम–विधि से संस्कृत अग्नि में होम करता है, वह कवियों का राजा हो जाता है।।१३।।

दूर्वा, कमल, त्रिमधु, विल्व-दल, गो-घृत से संयुत वीरेश।
रक्त-भाव को प्राप्त सुकुलभग-लिङ्गामृत ले द्रव्य विशेष।।
देवि! त्रिकोणाकार कुण्ड में करता है जो होम-विधान।
वह निःसंशय हो जाता है जगमें सत्कविराज महान।।१३।।

बलिदानप्रकारं प्रदर्शयँस्तत्फलं च प्रतिपादयन्नाह निशीथ इत्यादि–

निशीथे कल्याणि प्रमुदितमना यः पितृवने
बलिं ते मेषाद्यैः स-नरमहिषैर्वा परिचरेत्।
स राजानं क्षिप्रं वशयति मृगाक्षीसमुदयं
त्रिलोकीं वा भूमौ स भवति जनः सत्-कविवरः।।१४।।

टी०– हे कल्याणि! शिवे! निशीथेऽर्धरात्रे यः साधकः प्रमुदितमनाः प्रसन्नचेताः सन् पितृवने श्मशाने ते तुभ्यं स–नरमहिषैः नरैमैहिषैश्च सहितैर्मेषाद्यैरजाविप्रकारैर्वा बलिं दत्त्वा परिचरेत् पूजयेत् स क्षिप्रं द्रुतमेव राजानं महीपतिं मृगाक्षीसमुदयं स्त्रीवृन्दं त्रिलोकीं समस्तंजगतीं वा वशयति स्ववशमापादयति भूमौ पृथिव्यां स जनो भक्तः सत्कविवरः सत्काव्यकर्त्ता च भवति। उक्तं च 'नाऽधीत्य छन्दः शास्त्राणि विनालापं कवेरपि। गद्यपद्यमयी वाणी वक्त्रात् तस्य प्रजायते।' बलिविषयकव्यवस्था–ब्राह्मणस्य बलिर्यत्र तत्रायं विहितः क्रमः। कृत्वा घृतमयं सिहं नरं व्याघ्रं च भैरव!।। अथवाऽपूपविकृतं यवक्षोदमयं च वा। घातयेच्चन्द्रहासेन तेन मन्त्रेण संस्कृतम्। अवश्यं विहितं यत्र मद्यं तत्र द्विजोत्तमः। नारिकेलजलं कांस्ये ताम्रेवा विसृजेन्मधु। नापद्यपि द्विजो मद्यं कदाचिद् विसृजतेदपि। "अन्यच्चपायसं तु गजत्वेन मार्जारत्वे कुलुत्थकम्। वृन्ताकं कुक्कुटत्वेन मेषत्वेन च तुम्बिकाम्। माहिषत्वे मसूरान्नमुष्ट्रत्वे न च तुम्बिकाम्।" 'वामदक्षिणमार्गो हि काली ताराविधौ स्मृतः। द्राविडो दक्षिणः प्रोक्तो गौडो वामः प्रकीर्तितः।' इति वचनेन बलिदाने वामदक्षिणव्यवस्थैव व्यवहरणीया पशुबलिदानं क्षत्रियविषयकमेवाऽवगन्तव्यम्। महाकालसंहितातन्त्रादौ

च "नित्याऽनित्योपशुबलिर्नित्यो नैमित्तिकार्चने। काम्यं न नित्यवद् देवि! नैमित्तिकवदुच्यते। इति काम्ये बलिदाना वश्यकत्त्वम्। सात्त्विको जीवहिंसां वै कदाचिदपि नाचरेत्। इक्षुदण्डं च कूष्माण्डं तथा वन्यफलादिकम्। क्षीरपिण्डैः शालिचूर्णैः पशुं कृत्वा चरेद्बलिम्। वानप्रस्थो ब्रह्मचारी गृहस्थो वा दयापरः। सात्त्विको ब्रह्म निष्ठश्च यश्च हिंसाविवर्जितः। तुभ्यं दद्युः पशुबलिमनुकल्पं ददत्यपि। कूष्माण्ड–पनसा–ऽलावु–कर्कटी–बिल्व–दाडिमाः। द्राक्षा–खर्जूर–लकुच–रसाला–ऽऽमलक–जम्बुकम्। बलितुल्यानि चैतानि छागतुल्यानि तृप्तिषु' इत्यादि। ताराविषयकं पशुबलिदानं चेत्थम्। छागं वा महिषं वाऽपि शूकरं वा पतत्त्रिणम्। हस्तिनं मूषिकं वाऽपि मार्जारञ्चापि मेषकम्। दत्त्वा देवि! महादेव्यैः स भवेत् कुलनायकः। इति तारारहस्यवचनात्।।१४।।

बलिदान विधि को कहते हैं –

हे कल्याणि! आधी रात में प्रसन्न चित्त होकर जो साधक, श्मशान में मेष, छाग, नर महिष आदि के बलिदान द्वारा, तुम्हारी पूजा करता है, वह राजा तथा मृगनयनी कामिनियों और त्रैलोकय को भी अपने अधीन कर लेता है एवं जगत् में सत्कविरूप से प्रख्यात होता है।१४।।

अर्धनिशा को प्रेतभूमि में हे कल्याण! जो स्वच्छन्द।
मेष, छाग, नर महिष आदि का देता बलि तुमको सानन्द।।

वह नरपतियों मृगलोचनियों को वश करता है अत्यन्त।
तथा त्रिलोकी में होता है वह प्रसिद्ध कवि-श्रेष्ठ तुरन्त।।१४।।

शाक्तमार्गो द्विधा विभक्तः :– प्रथमो ज्ञानमार्गो द्वितीयोवाममार्ग आनन्दमार्गो वा, एतद्व्यतिरिक्तो दिव्यमार्गोऽपि मुमुक्षूणां कृते। इयता प्रबन्धेन ज्ञानमार्गोऽन्यरूपि साम्प्रतं वाममार्गः प्रस्तूयते। वाममार्गः पञ्चधा विभक्तस्तदाह–'कौलिकोऽङ्गुष्ठतां प्राप्तो वामः स्यात्तर्जनीं समः। चीनक्रमो मध्यमः स्यात् सिद्धान्ती योऽवरो भवेत्। कनिष्ठः शाबरो मार्ग इति वामस्तु पञ्चधा'' येषु चीनक्रमस्योपदेष्टा भगवान् बुद्धोऽन्येषां चतुर्णा भगवान् शिवः ताराक्रम एव चीनक्रमः, महर्षिर्वशिष्ठो भगवतो बुद्धादस्योपदेशमवाप्येमं क्रमं प्रावर्तिष्ट, इति तारातन्त्रे प्रसिद्धम्। अयं मार्गः कदा प्रभृति आर्यैः स्वीकृत इति सम्यड् निर्णेतुं न शक्यते तथाऽपि वैदिके साहित्येऽपि अत्याचारस्य क्वचित् स्फुटं क्वचित्प्रच्छत्रं रूपं दृश्यत इति कथयन्ति। एतदुपोद्वलकं प्रमाणं च वाममद्य सवितर्वाममु श्वो दिवे दिवे वाममस्मभ्यꣳ सावीः। वामस्य हि क्षयस्य देव भूरे–रया धिया वामभाजः स्याम (य०वे०८,६) इति मन्त्रे पञ्चधा वामशब्दस्य ग्रहणात् पञ्चमकाराणां बीजं मन्यन्ते। छान्दोग्ये च वामदेव्य सामश्रुतं 'न काञ्चन परिहरेत्तद्व्रतम्' इत्यादि प्रसङ्गेन अस्यैव मतस्य मूलं प्रपञ्चितम्। पूर्वोक्तं याजुषं वचनं कात्यायनेन सावित्रग्रहणे विनियुक्तं तथापि मन्त्राणां तपोवलादनेकार्थप्रतिपादकत्वमविरुद्धम्। छान्दोग्यवचनं प्राचीनभाष्यकारा एतदनुकूलमेव व्याख्यातवन्तः परन्तु वाममार्गः सर्वथा

अवैदिक इति कृत्वा नवीनैः परिवर्तितः। प्रस्थानभेदे श्रीमधुसूदनस्वामिभिः प्रोक्तम्–'वामागमादि शास्त्रं तु वेदवाह्यमेव, शङ्करदिग्विजये माधवाचार्योऽपि एवमेवाऽवादीत्। इत्यमेव वैष्णवैरपि स्वीकृतम्। निश्चलप्रभृतिभिर्नवीनतरैरेव व्यवस्थापित च यथा भगवान् बुद्धः श्रीविष्णोरवतारः सन्नपि वेदविरूद्धमसुराणां मोहनाय उपदिदेश तद्वाक्यं वेदविरुद्धत्वात्तस्य विष्णुत्वेऽपि अग्राह्यमेवमेव भगवतः शिवस्य वाममार्गप्रतिपादकवचनानां व्यवस्था उभयोरग्राह्यत्वे तुल्यत्वम्, ऐहिकमात्रविशयत्वात्, शिष्टैर्वि गृहीतवाच्च स्वाभाविक प्रवाहपतितपामराणां कृतेऽस्य विधानं व्यवस्थापनार्थे वा–सौत्रामण्यादौ 'सुराग्रहान् गृह्णाति' इत्यादि प्रसङ्गस्याप्ययमेवार्थः। वाममार्गस्थानां व्यक्तिक्रममवलोक्य इदानींतनैराध्यात्मिके विषयेऽभिप्रायो मकाराणां प्रदर्श्यते एवं कृते दिव्यमार्गेणास्य अभेद एव सिद्धो भवति श्रीतारानन्दस्वामिना यथा वाममार्गस्याभिप्रायः प्रदर्शितस्तथा निरूप्यते – 'मद्यं मीनं च मांसं च मुद्रां मैथुनमेव च। मकारपञ्चकं प्राहुर्योगिनां मुक्तिदायकम्।''मद्यम्' व्योमपङ्कजनिष्यन्दसुधापानरतो भवेत्। मद्यपानमिदं प्रोक्तमितरे मद्यपायिनः। ब्रह्मस्थानसरोजपात्रलसिता ब्रह्माण्डतृप्तिप्रदा या, शुभ्रा शुकुलासुधा विगलितां सा पानयोग्या सुरा। 'मांसम्।' पुण्याऽपुण्यपशुं हृत्वा ज्ञानखड्गेन योगवित्। परे लयं नयेच्चित्ते मांसाशी स निगद्यते। काम–क्रोध –पशु –सुलोभ –मोह–पशुकाँश्छित्वा विवेकासिना मांसं निर्विषयं परात्मसुखदं भुञ्जन्ति तेषां बुधाः। (भैरवामले) 'मीनम्' –मानसादीन्द्रियगणं, संयम्यात्मनि योजयेत्। स मीनाशी भवेद् देवि! इतरे प्राणिहिंसकाः।

'मुद्रा'—आशा—तृष्णा—जुगुप्सा—भय— विषय —घृणा— मान— लज्जा— प्रकोपाः ब्रह्माग्नावष्ट मुद्रा परसुकृतिजनः प्रच्यमानः समन्तात्। नित्यं सम्भावयेत्तानवहितमनसा दिव्यभावानुरागी, योऽसौ ब्रह्माण्डभाण्डे पशुहतिविमुखो रुद्रतुल्यो महात्मा। (भैरवामले) 'मैथुनम्'—या नाडी सूक्ष्मरूपा परम पदगता सेवनीया सुषुम्णा, सा कान्ताऽऽलिङ्गनार्हा न मनुजरमणी सुन्दरी वारयोषित्। कुर्याच्चन्द्रार्कयोगे युगपवनगते मैथुनं नैव योनौ, योगीन्द्रो विश्ववन्द्यः सुखमयभवने तां परिष्वज्य नित्यम्। इत्यादि अन्येऽपि प्रेक्षावन्तोऽस्मिन् विषय ईदृशीमेव रीति मन्यन्ते विस्तरभयान्नेह प्रोच्यते (अयमेव मकाराणां वास्तविकोऽर्थः; सच्चिदानन्दस्य ब्रह्मण इम एव पूर्णतोऽभिव्यञ्जकाः यद्यपि पार्थिवमकारैरपि व्यनक्ति ब्रह्मण आनन्द स्वरूपं तथापि क्षणिकत्वेन त्याज्यकोटावेतत्प्रविष्टं विषसम्पृक्ताभवत् पातित्यस्य च सम्भवात् व्यवस्थापनार्थमेव ग्रहणं तेषामित्यभिप्रायं सर्वं मनसि निधाय कथयति महापूजामिति—

महापूजां मातस्तव वितनुते यस्तु मधुना तथा मांसैर्मत्स्यैर्विविधनवमुद्रादिभिरपि।
वरस्त्रीभिः सार्धं निधुवनविनोदेन मुदितो निशीथे संसारात्स भवति विमुक्तः पशुभयात्।।१५।।

टी०— हे मातः! यः साधकप्रवरो निशीथेऽर्धनिशायां तुशब्दो भिन्नक्रमार्थः पूर्वोक्तज्ञानमार्गाद् भित्रेन आनन्दमार्गेणेत्यर्थः। मधुना मद्येन तथा मांसैः पिशितैर्मत्स्यैर्मीनैर्विविधनवमुद्रादिभिर्विधि

धप्रकारिकाभिर्नवमुद्राभिरपि वरमुद्रा भिरिति पाठान्तरं श्रेश्ठमुद्राभिरिति तदर्थस्तथा वरस्त्रीभिरङ्गनाभिः सार्धं सह निधुवनं रतं तेन विनोदस्तेन मुदितो हर्षितो ब्रह्मानन्दप्राप्तः तब महापूजां महत्त्वगुणयुक्तां निरुपद्रवामुपजनायापायरहितत्वेन मोक्षफलप्रदात्रीं विमुक्त इति लिङ्गात्, 'ऋते ज्ञानान्न मुक्तिः' इति प्रमाणात् सपर्यां वितनुते विस्तृणुते स पशुभयात् संसारात् विमुक्तो भवति 'ज्ञात्वा देवं मुच्यते सर्वपाशै' रिति श्रुतेः। घृणा लज्जा भयं शङ्काजुगुप्सा चेति पञ्चमी। कुलं शीलं तथा जातिरष्टौ पाशा इमे स्मृताः। पाशबद्धो भवेज्जीवः पाशमुक्तः सदा शिवः। ननु शक्तितत्त्वज्ञाने सति कथं मुक्तिर्यावता शिवज्ञानेनैव श्रवणादिति चेत्र शिवशक्त्योरमेदस्यामिमतत्वासर्वमवदातम्।।१५।।

उपर्युक्त श्लोकों द्वारा ज्ञान–मार्ग का निरूपण किया गया। अब वाम या आनन्द मार्ग का निरूपण करते हैं। 'मद्य,मांस,मत्स्य,मुद्रा, मैथुन'–इस पञ्चमकारों से शक्ति का पूजन इस क्रम में होता है। उनके आध्यात्मिक अर्थ भी होते हैं, जिन्हें संस्कृत टीका में सप्रमाण लिखा गया है। 'मद्य' पद से चन्द्रमण्डल से स्रवित सुधा, 'मांस' पद से काम क्रोधादि पशुओं का मांस, इन्द्रियों का निरोध कर आत्मा में लगाना–'मत्स्य' आशा तृष्णा आदि 'मुद्रा' सुषुष्णा नाडी से मन का योग– 'मैथुन' पद से लिया जाता है। इन अर्थों को ही आगे श्लोक में सङ्कत किया गया है। अस्तु, इसी अर्थ को बताते हुए कहते हैं–

हे मातः! जो साधक आधी रात में मद्य, मांस मत्स्य, नवमुद्रा तथा वरस्त्रियों के साथ मैथुन–द्वारा प्रसन्न होकर महापूजा करता है, वह पशु–भय वाले संसार से मुक्त हो जाता है। (घृणा, लज्जा, भय, शंका, जुगुप्सा, कुल, शील और जाति –ये आठ 'पाश' कहलाते हैं, पाश में बँधे हुए को पशु कहते हैं, अर्थात् महापूजा करने से साधक को संसार से मुक्ति प्राप्त होती है)।।१५।।

देवि! त्वदीय महापूजन जो करता है साधक विद्वान।
मदिरा, मांस, मीन, नवमुद्रा-द्वारा, कुल-क्रम से सविधान।।
उत्तम कामिनियों के सँग में करता है त्यों केलि-विलास।
हो जाता वह मुक्त जगत में, पशु-भय से निश्चय सोल्लास।।१५।।

रतासक्तचिन्तनं ब्रुवन् ध्यानप्रकारमाह त्रिकोण इति–

त्रिकोणे पीठे त्वां वरनिधुवनासक्तहृदयां
महाकालेनोद्यत्पुलकनिचयां स्मेरवदनाम्।
स्वयं नक्तं कान्तारतिरससमासक्तहृदयो
मनुष्यो यो ध्यायेद्भवति शिवतुल्यः स धरणौ।।१६।।

टी०– हे शिवे! त्रिकोणे पीठे। ब्राह्मणानां सदा लेख्यं त्रिकोण कर्णिकागतम्। मध्ये कूर्चे लिखेद् विद्वान् वृत्तद्वयमतः परम्। ततश्चाष्टदलं लेख्यं चतुर्बीजमतः परम्। पूर्वे लज्जाबधूर्दक्षे उत्तरे फ प्रकीर्तितः। पश्चिमे टं समाख्यातं कोणे च रेणुकायुतम्। चतस्र चतुर्द्वारं लिखेद्यन्त्रं सुशोभनम्। आधार चक्रस्थत्रिकोणाकार

योनिमण्डले महाकालेनाऽक्षोम्यशिवेन सार्धे वरनिधुवनासक्तहृदयां वरं श्रेष्ठं निधुवरं रतं तस्मिन्नासक्तं संलग्नं हृदयं यस्यास्तां शिवशक्ति सामरस्यपरायणाम्, उद्यत्पुलकनिचयां जातरोमाञ्च हर्षातिरेकात् स्मेरवदनाम् ईषद्धास्ययुक्तां तथा स्वयमपि नक्तं रात्रौ 'या निशा सर्वभूताना' मित्यादिना विधानात् कान्ता रतिरसममासक्तहृदयो वज्रोली सहजोलीति मुद्रासम्पन्नो यः साधकः समष्टिव्यष्टिरूपयोः कान्तयोरेकत्वचिन्तनपरायणः सन् 'इदमेव कान्ता रतिरससमासक्तत्वमिति रहस्यं' त्वां ध्यायेत् स्मरेत् स धरणौ पृथिव्यां शिवतुल्यः शिवसमो भवति। चिन्तनप्रकारश्चेत्थमुपदिष्टः–'पत्नीं ज्ञेयां महादेवीमात्मानं च महेश्वरम्। ऐक्यभावेन सम्पश्येत्स शिवः सन् गृहाश्रमी।। दक्षिणाचारे स्वपत्नी वामे कुलाङ्गना दिव्ये सुषुम्णेति विवेकः सर्वार्थस्य च सम्भवात्।।१६।।

महापूजा के अंतर्गत रतासक्त –चिन्तन का विशेषरूप से कहते हैं–

हे शिवे! आधार चक्र के त्रिकोणाकार योनिमण्डल में, शिव–शक्ति–साम–रस्य–परायण, रोमांच तथा मदहास्य युक्त तुम्हें –वज्रोली' मुद्रा युक्त होकर साधक समष्टि–व्यष्टि रूपकान्ता से एकत्वरूप कान्तारतिरसासक्त चित्तवाला होता हुआ, तुम्हारा ध्यान करता है, वह पुरुष जगत् में शिव तुल्य हो जाता है।।१६।।

देवि! त्रिकोण पीठ में वरनिधुवनासग्हृदया स्वच्छन्द।
महाकाल-द्वारा पुलकित तनु, मुख में शोभित हास्य सुमन्द।।
कान्ता-रति-रस-समासक्त हो, इस प्रकार करता तव ध्यान।
वह मनुष्य धरणी-मण्डल में हो जाता है शम्भु-समान।।१६।।

पूर्वोक्तेन क्रमेण जितेन्द्रियस्य योगमुद्रासम्पन्नस्य रतं प्रपञ्च्येदानीं तस्यैव जपप्रकारमाह समुत्तङ्गेति–

समुत्तुङ्गपीनस्तनजघनराजत्कुलवधू-
व्यवायव्यासक्तो जपति तव भक्तो यदि मनुम।
गलद्वासःकेशो जननि! मनुजो मेदनितले
स सिद्धीशः शक्त्या जयति सुचिरं सर्वसुजनम्।।१७।।

टी०–हे जननि! यदि समुत्तङ्गपीनस्तनजघनराजत्कुलवधू व्यवायव्यासक्तः=समुत्तङ्गे उन्नते, आपीने कठिने, स्तने तथाभूते जघने च, ताभ्यां राजन्ती शोभन्ती, कुलवधूः 'शाम्भवी मुद्रा' समकायशिरोग्रीवादिलक्षणैः सम्पन्ना 'अन्तर्लक्ष्यो बहिदृष्टिर्निमेषोन्मेषवर्जितः। एषा शाम्भवी मुद्रा तु सर्वतन्त्रेषु गोपिता। इयं शाम्भवी मुद्रा कुलवधूरिव गोपिता' इत्युक्तेः सम्यक्प्रकारेण बद्धा, तस्यां व्यवायो मैथुनं, प्राणाऽपानयोर्योगः तस्मिन् व्यासक्तः संलग्नचित्तस्तव भक्तस्तारिण्युपासको मनुष्यः गलद्वासः केशः सन् विकीर्णवस्त्रकुन्तलो बाह्यानुसन्धानरहित इत्यर्थः, मनुं मन्त्रं जपति मनसा चिन्तयति, स मेदनितले जगति, सिद्धीशः सिद्धीना मणिमादीनामीशः स्वामी सन्, शक्त्या चिन्तनजन्यसामर्थ्येन सुचिरं

शींध्रं यथा सर्वसुजनं समस्तसुजनसमुदायं, जयति स्ववशमापादयतीत्यर्थः। एवमनुष्ठिते सर्वजयनसामर्थ्यवान् साधको भवतीति भावः।।१७।।

रतासक्त जप प्रकाश बताते हैं –

हे जननि! उन्नत स्थूल स्तन तथा जघन–प्रदेश से शोभित जो कुल बधू 'शाम्भवी–मुद्रा' शिर ग्रीवादि समभाव–द्वारा बाँधी हुई, उसमें प्राण अपान के ऐक्य–द्वारा व्यवाय (मैथुन) में आसक्त तथा बाह्यानुसन्धान रहित होकर यदि आपका भक्त मंत्र जपता है, तो वह सिद्धियों का स्वामी तथा चिन्तन जन्य सामर्थ्य–द्वारा सब सुजनों पर विजय प्राप्त करता है।।१७।।

उन्नत पीन पयोधरवाली सुन्दर-जघना हो जो वाम।
हो व्यवाय-रत उससे, जपता तव मनु को जो भक्त सकाम।।
वह भूतल पर सकल सिद्धियों का हो जाता मातः! ईश।
सब सुजनों पर चिरस्थायिनी पाता है जय विश्वेबीस।।१७।।

दीर्घायुष्टवाग्मित्वप्रतिपादकं होममाह भवानीति –

भवानि! श्रीमातर्निजगलितवीर्याप्तचिकुर
मथ प्रेम्णा लब्ध्वा वचनभुवनेशीयुतमनुम्।
समुच्चार्य क्षोणीतनयदिवसे प्रेतसदने
स दीर्घायुर्वाग्मी भवति शतहोमात्क्षितितले।।१८।।

टी०– हे भवानि! श्रीमातः! अथ अनन्तरं यः प्रेम्णा अत्यादरेण निज गलितवीर्याप्तचिकुरं निजेन गलितेन सम्पादितेन वीर्येण सामर्थ्येन आप्तं मिश्रितं चिकुरं कुन्तलं सामर्थ्यविशेषं वा लब्ध्वा सम्पाद्य वचनभुवनेशीयुतं मनुं वचनं ऐँ कारो भुवनेशी ह्रीँ कारस्ताभ्यां युतं मनुं (ऐँ ह्रीँ स्त्रीँ हूँ फट् स्वाहा) इत्याकारकं समुचार्य दीर्घमुचार्य क्षोणीतनयदिवसे भौमवासरे प्रेतसदने श्मशाने शतहोमात् शतसंख्यात्मकाहुतिप्रदानात् क्षितितले भूतले स दीर्घायुश्चिरञ्जीवी तथा वाग्मी प्रशस्तवक्ता भवतीत्यर्थः। उक्तं च–'मासं रक्तं तिलं केशं नखं भक्तं च पायसम्। आज्यं चैव विशेषेण जुहुयात् सर्वसिद्धये।।१८।।

दीर्घायु तथा वक्ता होने का होम–प्रकार कहते हैं–

हे भवानि! जो साधक प्रेम से अभ्यास प्राप्त सामर्थ्य सम्पादन करके 'ऐँ ह्रीँ स्त्रीँ हूँ फट्' – इस मन्त्र का दीर्घ स्वर से उच्चारण करके मंगलवार के दिन श्मशान में एक शत आहुति प्रदान करता है, वह पृथिवी पर दीर्घायु तथा सुवक्ता होता है।।१८।।

हे भवानि! निज गलित वीर्य में चिकुर-समूह मिला वीरेश।
वाग्भव-भुवनेशी युत मनु को उच्चारण कर, जो सविशेष।।
भौमवार को श्मशान-भूमि में करता है शत आहुति-दान।
होती उसकी दीर्घ आयु, वह पाता है वाग्मित्व महान।।१८।।

इदानीं ध्यानेन सार्धे भोगमोक्षप्रदं जपप्रकारं कथयन्नाह अजस्रमिति–

अजस्रं यो मन्त्रं जपति तव भूमीधरसुते।
विचिन्त्याग्रे मातः! कुसुमललितं मारभवनम्।
धरण्यां कन्दर्पप्रतिमतनुभूतः स सकलान्
निजेष्ठानापन्नोति प्रविशति मुदा तारिणिपदम्।।१६।।

टी०– हे भूमीधरसुते! पर्वतकन्यके! कुसुमललितं मारभवनम् अग्रेऽभागे विचिन्त्य दृढ़ीभावेन ध्यात्वा यः कश्चित् साधकस्तव मन्त्रं मन्त्रराजमजस्रमविरतं यथा तथा जपति स धरण्यां पृथिव्यां कन्दर्पप्रतिमतनुभूतः कामसदृशपूर्णसौन्दर्य युक्तदेहो भवन् स सकलान् समस्तान् निजेष्टान् स्वाभिष्टान् आप्नोति मुदा हर्षेण बिना श्रमेण तारिणिपदं च प्रविशति 'डयापोः संज्ञा छन्दसोर्बहुलम्' इति ह्रस्वः, वैष्णवाख्यं पदं प्राप्य मोक्षाख्यं सुखमनुभवतीत्यर्थः। कुसुमललितं मारभवन मित्यस्य विवरणम्–कुसुमैर्दयाहिंसादिपूर्वोक्तपुष्पनिकरैललितं सुन्दरं मारभवनं मारः कामस्तस्य भवनं तदुक्तं गोविन्दराजेन–कामशब्दो रहस्यागमे शरीरवैश्वानरे रूढः, एवं तेजोमयं कामं स्वाधारगमनं भावयेत्। तथा चोक्तं रुद्रयामले–भ्रमन् योनिगतं ध्यायेत्कामं बन्धूकसन्निभम्। ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम्। आधारचक्रे त्रिकोणाकारगते चिन्तनं कामस्य मारभवनपदेनाभिहितमिति रहस्यम्।।१६।।

अब ध्यान के साथ भोग–मोक्ष–प्रद–जप प्रकार कहते हैं–

हे हिमाचलपुत्रि! जो साधक दया, अहिंसा आदि पुष्पों से सुशोभित दुपहरिया के पुष्प सदृश रक्त वर्ण काम–भवन (शरीरस्थ वैश्वानर) को चिन्तन करते हुए, आपके मन्त्र को जपते हैं, वे कामदेव के तुल्य सुन्दर एवं समस्त अभीष्टों को प्राप्त होते हैं तथा अनायास ही तारिणी पद को प्राप्त करते हैं।।१६।।

कुसुमित मार-सदन के चिन्तन में रत योग-निष्ठा जो वीर।
जपता मन्त्रराज तब सन्तत धरणीधरतनये! धर धीर।।
होता स्मर-सम सुन्दर, उसके होते सकल मनोरथ पूर्ण।
एवं निश्चय हो पाता है वह श्री तारिणी-पद को तूर्ण।।१६।।

विशेषकालिकं सिद्धिप्रदातृत्वं मन्त्रस्य स्फुटयन्नाह तम इत्यादिना –

तमोग्रस्ते चन्द्रे यदि जपति लोकस्तव मनुं
नवम्यां वा मातर्धरणिधरकन्ये! वितनुते।
तथा सूर्येपृथ्वीवलयतिलकः काव्यतटिनी
पयोधिः सिद्धीनां भवति भवनं सर्वविदितः।।२०।।

टी०– हे मातः! धरणिधरसुते! हिमाचलतनये! यदि लोकः साधकस्तमोग्रस्तेचन्द्रे चन्द्रग्रहणवेलायां तव मनुं श्रीताराविद्यां जपति वा नवम्यां चैत्रशुक्लनवम्यां वितनुते विस्तृणोति तथा सूर्ये सूर्यग्रहणे

च जपति स पृथिवी वलयतिलकः निखिलभूमण्डलाग्रगण्यः सर्वविदितः सर्वेषु लोकेषु विख्यातः सन् काव्यतटिनीपयोधिः काव्यतटिनीनां काव्यस्रोतस्वतीनां पयोधिः समुद्रः तासां प्राप्तिस्थानमिति यावत् तथा सिद्धीनामणिमादीनां भवनं निवासस्थानं भवतीति सरलार्थः।।२०।।

मन्त्र – सिद्धि के विशेष समय को बताते हैं।

हे मातः! धरणिधरकन्ये! यदि कोई साधक चन्द्रग्रहण, सूर्यग्रहण तथा चैत्रशुक्ल नवमी के दिन मन्त्र जप करता है, तो वह पृथिवी मण्डल में सर्वप्रथम अर्थात् अग्रणी, काव्यस्रोत का समुद्र और सब लोकों में प्रसिद्ध होता हुआ सब सिद्धियों का स्थान हो जाता है।।२०।।

चन्द्र-सूर्य के ग्रहण-समय या नवमी को जो तब मनुराज।
मातः! गिरिवरकन्ये! जपता संयत मन से कहीं विराज।।
पृथ्वीवलय तिलक वह होता काव्य नदी का पारावार।
तथा विश्व-विश्रुत हो जाता सकल सिद्धियों का आगार।।२०।।

बहुषु पुस्तकेषुविंशतिश्लोका एव स्तोत्रस्य दृश्यन्ते केषुचिदन्येषां पञ्चानामपि पाठः स्तोत्रमाहात्म्यरूपात्मको दृश्यते तेषामपि स्तोत्राङ्गत्वं विज्ञाय व्याख्यायते–

विंशतिश्लोकैविद्यात्त्वमुपदिश्येदानीं भक्ति रसाप्लुतेन श्लोकद्वयेन प्रार्थनाप्रकारं दर्शयति सदेति–

सदा पादाम्भोजे भजतु हृदयं भृङ्ग इव मे
सदा पाणिद्वन्द्वं परिचरतु कर्णस्तव कथाम्।
श्रृणोतु त्वत्कीर्तिं हरमहिषि! गीर्गायतु सदा,
सदा दृष्टिर्भूयाद भवदनुचरालोकनपरा।।२१।।
कदा काले शैलेश्वरतनुभवे! पादयुगलं
मुदा द्रक्ष्ये ब्रह्मप्रमुखविबुधानां परिणुतम्।
कृपापारावारे! भवजननभीतैकशरणे!
शरण्ये! कारुण्यं मयि वितर दीने भगवति!।।२२।।

टी०– हे हरमिहिषि! शङ्करपत्नि! में मम हृदयं भृङ्ग इव भ्रमर इव सदा सर्वस्मिन् काले तव पादाम्भोजे चरणकमले भजतु सेवताम्। पाणिद्वन्द्वं हस्तयुगलं सदा सर्वदा परिचरतु मम हस्तद्वयं त्वत्पूजादिकार्येषु सदा संलग्नं स्यादित्यर्थः। कर्णः श्रोत्रं तव कथां त्वदीयचरितं श्रृणोतु। गीर्वाणी सदा त्वत्कीर्तिं तब यशोगायतु तथा मे दृष्टिः सदा भवदनुचरालोकनपरा त्वदीयभक्तानां दर्शनपरा भूयातृ। हे शैलेश्वरतनुभवे! हिमाचलतनये! 'कदा काले' इत्यनेनातीवौत्कण्ठ्य' दर्शयति। ब्रह्मप्रमुखविबुधानां परिणुतं ब्रह्मप्रभृतिदेवैः परितः स्तुतं वन्दितं पादयुगलं तव चरणद्वयं मुदा हर्षपूरितेन चेतसा द्रक्ष्ये साक्षात्कारवान् भविष्यामि। हे कृपापारावारे! अत्यन्तदयामयि! भवजननभीतैकशरणे! संसृतेजननमरणादिक्लेशेभ्यो भीतानां शरणदात्रि!

शरण्ये! रक्षिके! भगवति! षडैश्वर्ययुते! मयि दीने अनाथे कारूण्यं त्वन्निरतिशयदयालुत्वं वितर देहि।।२१।।२२।।

अब दो श्लोकों से भक्ति का वर्णन करते हैं–

हे हरमहिषि! आपके चरण–कमलों को हमारा मन भृङ्ग की तरह सेवन करै, हमारे दोनों हाथ आपकी ही परिचर्या करैं, हमारे दोनों कान आपके ही यश की कथाओं को सुनैं , हमारी वाणी आपकी ही कीर्त्ति का कीर्त्तन करैं और हमारी दृष्टि आपके अनुचरों के ही दर्शन में सदा लगी रहे।।२१।।२२।।

तब पादाम्बुज का सेवन मम हृदय मधुप-सा करै सदैव।
करैं युगल कर तव परिचर्या, कर्ण सुनें तव कथा तथैव।।
करै सदा हरमहिले! मेरी वाणी तव यश का गुण-गाान।
और दृष्टि तव अनुचर-दर्शन में नित लगी रहै अम्लान।।२१।।

हे हिमाचलपुत्रि! ब्रह्मा प्रमुख देवों से सेवित आपके चरण युगलों को हर्षपूरित नेत्रें से कब देखूँगा? हे कृपा की पारावार (समुद्र)! संसार से भीतों की रक्षा करने वाली! शरणदायिनि! मुझ अशरण दीन पर अपनी अहैतुकी दया को प्रदान कीजिये।।२२।।

ब्रह्मा प्रमुख विबुध गण सेवित तब पद-कमल युगल सुखदान।
देखूँगा कब? शैलेश्वरतनुभवे! अहा! मैं मुदित महान।।
कृपा समुद्र तुम भव-भीतों की रक्षा करती सतत निदान।
शरणदायिनि भगवति! कीजे मुझ दरिद्र पर करुणा-दान।।२२।।

श्लोकत्रयेण स्तोत्रफलमाह सदैवेति–

सदैव स्तोत्रं यः पठति मुदितः साधकवरो
न दारिद्र्यं तस्य प्रभवति कदाचित् क्षितितले।
त्रिवर्गो हस्ते स्याज्जगदखिलमेतश्च वशगं
चिरं जीवन्नन्ते जननि! लभते मोक्षपदवीम्।।२३।।

टी०–हे जननि! यः साधकवरः मुदितः प्रसन्नः सन् सदैव स्तोत्रं तवेमं स्तवं पठति तस्य कदाचित् कस्मिन्नपि काले क्षितितलेऽस्मिन् जगति दारिद्र्यं न प्रभवति एतत्स्तोत्रपाठको दारिद्र्याभिभूतो न कदापि भवतीति–अथः। तस्य त्रिवर्गः अर्थ–धर्म–कामाख्यो हस्ते स्यात् अधीनो भवेत् च पुनः एतदखिलं समस्तं जगद्वशगं स्यात्तथा चिरं बहुकालपर्यन्तं जीवन्नन्तेऽन्तिमावस्थायां मोक्षपद्वीं ब्रह्मात्मैक्यलक्षणां निष्ठां लभते प्राप्नोतीत्यर्थः।।२३।।

अन्त में अब तीन श्लोकों द्वारा स्तोत्र फल कहते हैं –

जो साधक प्रसन्न होकर नित्यप्रति इस स्तोत्र को पढ़ता है, वह संसार में दरिद्रता से कभी अभिभूत नहीं होता। समस्त जगत अर्थ, धर्म और काम रूप त्रिवर्ग उसके अधीन होते हैं एवं संसार से बहुकाल पर्यन्त जीवित होता हुआ, अन्त में ब्रह्मात्मैक्यरूप मोक्ष–पदवी को प्रापत होता है।।२३।।

जो प्रसन्नता से साधक वर करता है इस नुति का पाठ।
उसे नहीं दारिद्र्य सताता, बढ़ता उसका वैभव-ठाठ।।
सब जग वश में होता, कर में होते धर्म, अर्थ औ' काम।
चिरजीवी हो, पाता है वह अन्त मोक्ष-पदवी अभिराम।।२३।।

इदं स्तोत्रं मातः! प्रपठति दिवारात्रिमनिशं
स सर्वज्ञो योगीश्वरनिकरचूडामणिसमः।
जडोऽपि त्वद्रूपं जपति यदि सञ्चिन्त्य मनसा
त्वदग्रे भूयोच्चैः क्षितिपतिसमानः क्षितितले।।२४।।

टी०– हे मातः! यः कचित्साधकस्त्वदग्रे तव पुरतः भूयः पुनः पुनः उच्चैः उच्चैः स्वरेण तथा मनसा त्वदूरूपं तव स्वरूपं सञ्चिन्त्य सम्यग्ध्यात्वा जडोऽपि सन् तवेदं स्तोत्रं जपति पठति स अस्मिन् क्षितितले संसारे क्षितिपतिसमानः चक्रवर्तितुल्यो भवति तथा यो दिवारात्रिमहोरात्रमनिशं निरन्तरं प्रपठति स सर्वज्ञः योगीश्वरनिकरचूडामणिसमः योगीश्वराणां निकरः समुदाय स्तस्य चूडामणिः भूषणमिव सर्वश्रेष्ठत्वगुणयुक्तः कश्चिद् विरक्तशिरोमणिस्तेन समस्तुल्यो भवतीति शेषः। एतत्स्तोत्रस्याभ्यासकर्ता साधकः सर्वैर्वन्द्यः स्यादिति भावः।।२४।।

हे अम्बिके! यदि जड़ मनुष्य भी तुम्हारे रूप का चिन्तन करता हुआ। इस स्तोत्र को रात–दिन पढ़ता है, तो वह विरक्त योगीश्वरों–के समान होकर सर्वज्ञ तथा चक्रवर्ती के तुल्य हो

जाता है।।२४।।

इस स्तोत्र को पढ़ाता रहता मातः? जो सन्तत दिन-रात।
होता है वह योगीश्वर-कुल-चूड़ामणि, सर्वज्ञ, सु-ख्यात।।
यदि जड़ जन भी तव स्वरूप का चिन्तन करता निकट त्वदीय।
तो वह क्षितितल में होता है क्षिति-पति सदृश सदा नमनीय।।२४।।

महापुण्यं धन्यं सकलपुरुषार्थैकनिलयं
यशस्यं चायुष्यं सततभवतापापहमिदम्।
रहस्यं प्राकाश्यं नहि खलु कदाचित्पशुजने
पठेत् पूजाकाले जननि! लभते मोक्षपदवीम्।।२५।।

टी०– हे जननि! महापुण्यं महत्वपुण्यकरं धन्यं सकलपुरुषार्थैकनिलयं समस्त पुरुषार्थाश्रयभूतं यशस्यं यशस्करमायुष्यं दीर्घजीवित्वप्रदं सततभवतापापहं–अनवरतसंसारदुःखत्रयनाशकम्, इदं स्तोत्रं रहस्यं गोपनीयभूतं कदाचिदपि काले पशुजनेऽनधिकारिणि नहि प्राकाश्यं न ह्येतदुपदेष्टव्यं यदि साधकः पूजाकाले पठेत् स मोक्षपदवीं श्रीतारासायुज्यं खलु निश्चयेन लभते प्राप्नोतीत्यर्थः।।२५।।

इति श्रीफेत्कारिणीतन्त्रे शिवपार्वतीसम्वादे
श्रीताराकर्पूरस्तोत्रं प्रकाशिकया व्याख्यया सहितं समाप्तम्।।

महान पुण्य, धन्य, समस्त पुरुषार्थों का आश्रय, यश तथा आयुष्य प्रदान करने वाला, अनवरत संसार के दुःखों का विनाशक यह तारिणी महाविद्या का रहस्यरूप स्तोत्र अनधिकारियों को नहीं

बताना चाहिये। हे जननि! जो कोई भक्त पूजाकाल में इसका पाठ करेगा, उसे तारासायुज्य–रूप मोक्ष की अवश्य प्राप्ति होगी।।२५।।

इति श्रीफेत्कारी तन्त्र में शिव-पार्वती सम्वाद में कहा हुआ श्रीताराकर्पूर स्तोत्र का भाषा-भावार्थ समाप्त।

महापुण्यकर परमधन्य, यह सब पुरुषार्थों का आवास।
यश आयुष्य बढ़ानेवाला, करता है भव-ताप विनाश।।
यह रहस्य करना न चाहिये पशुजन-सम्मुख कभी प्रकाश।
पूजा समय इसे पढ़ता जो, पाता मोक्ष-धाम का वास।।२५।।

इति श्रीफेत्कारी तन्त्र में शिव–पार्वती–सम्बाद में कहा हुआ

श्री ताराकर्पूरस्तोत्र का श्रीमान् फौजदार पर्वतसिंह तनय साहित्य-भूषण श्रीकुँवरबलवीर सिंह विरचित हिन्दी-पद्यानुवाद समाप्त।

इति श्रीताराकर्पूरस्तोत्रम्

☼ श्रीताराष्टकम ☼

मातर्नीलसरस्वति! प्रणमतां सौभाग्यसम्प्रत्प्रदे!
प्रत्यालीढपदस्थिते! शवहृदि स्मेराननाम्भोरुहे!
फुल्लेन्दीवरलोचने! त्रिनयने! कर्त्रीकपालोत्पले!
खड्गंचादधतीं त्वमेव शरणं त्वामीश्वरीमाश्रये।।१।।
वाचामीश्वरि! भक्तकल्पलतिके सर्वार्थसिद्धीश्वरि!
गद्यप्राकृतपद्यजातरचनासर्वार्थसिद्धिप्रदे!।
नीलेन्दीवरलोचनत्रययुते! कारुण्यवारांनिधे!
सौभाग्यामृतवर्धनेन कृपया सिञ्च त्वमस्मादृशम्।।२।।
खर्वे! गर्वसमूहपूरिततनौ सर्पादिवेषोज्वले!
व्याघ्रत्वक्परिवीतसुन्दरकटिव्याधूतघण्टाङ्किते!।
सद्यः कृत्तगलदरजः परिमिलन् मण्डद्वयींमूर्धज–
ग्रन्थिश्रेणिनृमुण्डदामललिते! भीमेर्भयं नाशय।।३।।
मायानङ्गविकाररूपललनाविन्द्वर्धचन्द्राम्बिके!
हूँफट्कारमयि! त्वमेव शरणं मन्त्रात्मिके! मादृशः।
मूर्तिस्ते जननि! त्रिधामघटिता स्थूलातिसूक्ष्मापरा
वेदानां न हि गोचरा कथमपि प्राज्ञैर्नुतामाश्रये।।४।।
त्वत्पादाम्बुजसेवया सुकृतिनो गच्छन्ति सायुज्यतां
तस्याः श्रीपरमेश्वरत्रिनयनब्रह्मादिसाम्यात्मनः।
संसाराम्बुधिमज्जनेऽपटतनुर्देवेन्द्रमुख्यान् सुरान्

मातस्त्वत्पदसेवने हि विमुखाः किं मन्दधोः सेवते।।५।।
मातस्त्वत्पदपङ्कजद्वयरजो मुद्राङ्ककोटीरिण–
स्ते देवा जयसंगरे विजयिनो निःशङ्कमङ्के गताः।
देवोऽहं भुवने न मे सम इति स्पर्धा वहन्तः परा–
स्तत्तुल्यां नियतं यथा शुचिरवो नाशं व्रजन्ति स्वयम्।।६।।
त्वन्नामस्मरणात् पलायनपरा द्रष्टुं च शक्ता न ते
भूताः प्रेत–पिशाच–राक्षसगणा यक्षाश्च नागाधिपाः।
दैत्या दानवपुङ्गवाश्च खचरा व्याघ्रादिका जन्तवो
डाकिन्यः कुपितान्तकश्च मनुजो मातः! क्षणं भूतले।।७।।
लक्ष्मीः सिद्धिगणश्च पादुकमुखाः सिद्धास्तथा वैरिणां
स्तम्भश्चापि वराङ्गने! गजघटास्तम्भस्तथा मोहनम्।
मातस्त्वत्पदसेवया खलु नृणां सिध्यन्ति ते ते गुणाः
क्लान्तः कान्तमनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः।।८।।
ताराष्टकमिदं पुण्यं भक्तिमान् यः पठेन्नरः।
प्रातर्मध्याह्न काले च सायाह्ने नियतः शुचिः।।९।।
लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत्।
लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान् यथेप्सितान्।।१०।।
कीर्तिं कान्तिं च नैरुज्यं प्राप्याऽन्ते मोक्षमाप्नुयात्।।११।।

इति श्रीनीलतन्त्रे ताराष्टकं समाप्तम्।।

❁ श्रीनीलसरस्वतीस्तोत्रम् ❁

घोररूपे महारावे सर्वशत्रुवशङ्करि!
भक्तेभ्यो वरदे देवि! त्राहि मां शरणागतम्।।१।।
सुराऽसुरार्चिते देवि! सिद्धगन्धर्वसेविते!
जाडयपापहरे देवि! त्राहि मां शरणागतम्।।२।।
जटाजूटसमायुक्ते लोलजिह्वानुकारिणि।
द्रुतबुद्धिकरे देवि! त्राहि मां शरणागतम्।।३।।
सौम्यरूपे घोररूपे चण्डरूपे नमोऽतु ते!
सृष्टिरूपे नमस्तुभ्यं त्राहि माँ शरणागतम्।।४।।
बुद्धिं देहि यशो देहि! कवित्वं देहि देहि मे।
कुबुद्धिं हर मे देवि! त्राहि मां शरणागतम्!।।५।।
इन्द्रादिदिविषद् – वृन्दवन्दिते करुणामयि!।
तारे! ताराधिनाथास्ये! त्राहि मां शरणागतम्।।६।।
अष्टम्यां वा चतुर्दश्यां नवम्यां चैकमानसः।
षण्मासैः सिद्धिमाप्नोति नाऽत्र कार्या विचारणा।।७।।
मोक्षार्थी लभते मोक्षं धनार्थी धनमाप्नुयात्।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकाम्।।८।।
इदं स्तोत्रं पठेद्यस्तु सततं लभते नरः।
तस्य शत्रु क्षयं याति महाप्रज्ञा च जायते।।९।।

पीडायां वापि संग्रामे जप्ये दाने तथा भये।
य इदं पठति स्तोत्रं शुभं तस्य न संशयः।।१०।।
स्तोत्रेणानेन देवेशि! स्तुत्वा देवीं सुरेश्वरीम्!।
सर्वान् कामानवाप्नोति सर्वविद्याानिधिर्भवेत्।।११।।
इति ते कथितं दिव्यं स्तोत्रं सारस्वतप्रदम्।
अस्मात् परतरं नास्ति स्तोत्रं तन्त्रे महेश्वरि।।१२।।

इति बृहन्नीलतन्त्रे द्वितीयपटले
तारिणीनीलसरस्वतीस्तोत्रं समाप्तम्।

❁ श्रीपीताम्बराष्टकम् ❁

ज्ञेयं नित्यं विशुद्धं यदपि नुतिशतैर्बोधितं वेदवाक्यैः
सच्चिद्रूपं प्रसन्नं विलसितमखिलं शक्तिरूपेण ज्ञातुम्।
शक्यं चैतां प्रजुष्टां भवविलयकरीं शुद्धसंवित्स्वरूपां
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।१।।

गौराभां शुभ्रदेहां दनुजकुलहरां ब्रह्मरूपां तुरीयां
वज्रं पाशं च जिह्वामसुरभयकरीं लौहबद्धां गदाख्याम्।
हस्तैर्नित्यं वहन्तीं द्विजवरमुकुटां स्वर्णसिंहासनस्थां
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।२।।

कौर्म रूपं विधात्रीं कृतयुगसमये स्तब्धरूपां स्थिराख्यां
हारिद्रे दिव्यदेहां विबुधगणनुतां विष्णुना वन्दितां ताम्।
आनर्चुः स्कन्दमुख्याः स्मरहरमहिलां तारके संविवृद्धे
नाम्ना पीताम्बराढयां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।३।।

आधारे तत्वरूपां त्रिबलयसहितां योगिवृन्दैः सुध्येयां
पीतां रुद्रेण सार्धं रतिरसनिरतां चिन्तयित्वा मनोज्ञाम्।
गद्यं पद्यं लभन्ते नवरसभरितं सान्द्रचन्द्रांशुवर्णा
नाम्ना पीताम्बराढयां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।४।।

मायाबीजं महोग्रं पशुजभयहरं भूमियुक्तं जपन्ति

पुत्रैः पौत्रैः समेताः प्रणिहितमनसः प्राप्य भोगान् समस्तान्।
लब्ध्वा चान्ते विमोक्षं विगतभवभया मोदमाना भवन्ति
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।५।।

ध्यानं मातस्त्वदीयं जपमनुसततं मन्त्रराजस्य नित्यं दुष्टैः
कृत्या स्वरूपा बलग इति कृता आशु शान्तिं प्रयान्ति।
तस्मादाख्यां त्वदीयां द्विभुजपरिणतामुग्रवेषां सुभीमां
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।६।।

जप्त्वा बीजं त्वदीयं यदि तव सुजनो याति विद्वेषिमध्ये
रूपं दृष्ट्वा तदीयं रिपुजनसकलः स्तम्भनं याति शीघ्रम्।
गर्वी सर्वत्वमेति श्रवणपथगते नामवर्णे त्वदीये
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।७।।

ब्रह्मा विष्णुर्महेशो जपति तव मनुं भावयुक्तं महेशि!
लब्ध्वा कामं स्वरूपं समरसनिरता दिव्यभावं भजन्ते।
तामेवाहं भवानीं भवसुखविरतो भावयुक्तं स्मरामि
नाम्ना पीताम्बराढ्यां सततसुखकरीं नौमि नित्यं प्रसन्नाम्।।८।।

धन्यास्ते भक्तियुक्ताः सततजपपरा हीनवर्णेऽपि जाता
वैमुख्ये लग्नचित्ता यदपि कुलपरा नो प्रशस्याः कदाचित्।
इत्थं सञ्चिन्त्य मातः। प्रतिदिनममलं नामरूपं त्वदीयं
सर्वं सन्त्यज्य नित्यं सततभयहरे! कीर्तये सर्वदाऽहम्।।९।।

स्तोत्रेणाऽनेन देवेशि! कृपां कृत्वा ममोपरि।
बगलामुखि! मे चित्ते वासं कुरु सदाशिवे! ।।१०।।
यः कश्चित् प्रपठेन्नित्यं प्रातरुत्थाय भक्तितः।
तस्य पीताम्बरा देवी शीघ्रं तुष्टिं समेष्यति।।११।।
प्रयतो ध्यानसंयुक्तो जपान्ते यः पठेत् सुधीः।
धनधान्यादिसम्पन्नः सान्निध्यं प्राप्नुयाद् द्रुतम्।।१२।।

❁ इति श्रीपीताम्बराष्टकं समाप्तम ❁

इदं श्रीपीताम्बराष्टकं श्रीपरमहंसपरिव्राजकाचार्यवर्यैः श्रीस्वामि पादैरकारि तेषां शुभप्रेरणया दतियानगरस्य श्रीवनखण्डेश्वरस्य सन्निधौ श्रीपीताम्बरभगवत्याः स्थापनं ज्येष्ठकृष्णस्य पञ्चभ्यां तिथौ सम्वत् १९९२ वैक्रमे गुरुवासरे महता समारोहेण जातम्। अस्मिन् वर्षे १९९७ वैशाखमासस्य शुक्लषष्ठ्यां पञ्चमकवि नामनि पर्वतशिखरे श्रीताराभगवत्याः पीठस्थानमपि तेषामेवानुग्रहेण स्थापितमभूत्, तदवसरे श्रीताराकर्पूरस्तोत्रस्य व्याख्यां कर्तुं तैरेव परमानुग्रहः प्रादर्शि। पीठद्वयस्याऽयमेव पुस्तकरूपः संक्षिप्तपरिचयः।

श्री पीताम्बरा पीठ
ह्रीं
दतिया (म.प्र.)